द्वितीयपत्रप्रभृतिविवेचितेषु पदार्थेषु आदौ आत्मनि सुखदुःखादिसंसारस्य सम्बन्धः प्रत्यक्षादिप्रमाणेन साधयितुमशक्यत्वान्मिथ्या। मिथ्याभूतोऽपि अज्ञानात् सन्निवावभासते। अज्ञाननिरासाय च शास्त्रारंभ इति प्रतिजानीते। एतत्साधनाय आत्मनः संसारेण विशेषण-विशेष्यभावं समवायं च सम्बन्धं च खण्डयति। अपि च 'असंगो ह्ययं पुरुष' इति वेदादेवात्मनि संसारो मिथ्येति परिज्ञायते। वेदश्चापौरुषेयतया स्वतःसिद्धप्रमाणभावः प्रत्यक्षाद्यपेक्षया प्रबल इति प्रत्यक्षसिद्धं संसारं बाधितुं समर्थः, इति वदन् एतत्साधयितुं वेदापौरुषयत्वं विस्तरेण साधयति।

तत्प्रसंगादेव च शब्दनित्यत्वं वर्णातिरिक्तस्फोटस्याप्रामाणिकत्वं च न्यरूपि। वेदप्रामाण्यं च स्वाभाविकशक्तिं विना दुर्घटमित्यतः अलौकिकशक्तिः साधिता। ज्ञानानां स्वतः प्रामाण्यं वेदान्तानां सिद्धब्रह्मबोधकत्वं चा खण्डार्थवादे आवश्यकमित्यतः तयोः ततःपरं साधनम्।

द्वितीयाध्याये च स्वमतस्थापनमेव किञ्चिद्दूरमनुकृष्यते। अत्रादौ तत्पदार्थस्येश्वरस्य वेदादेव ज्ञानं यूपाहवनीयादिवत् न त्वनुमानादिनेत्येतत् सूचयितुं ईश्वरानुमानखण्डनमावश्य-

कमासीत् परमाणुवादश्च समूलं खण्डितः। ततः मायास्वरूपं मायाकार्यप्रपञ्चश्च मिथ्येति ततो निर्धारितम्। अद्वैतस्य प्रमाणप्रश्नात्प्रागेवसिद्धत्वं प्रत्यक्षाद्यबाधः द्वैतस्य स्फुरणसंबन्धानिरूपणान्मिथ्यात्वं च ततः साधितानि।

इतःपरं द्वैतसत्यत्वमास्थितानां वावदूकानां मतानि निराकरोति। कणादाभिमतषट्पदार्थीदूषणं गौतमोक्तषोडशपदार्थनिराकरणं सांख्यसिद्धपञ्चविंशतितत्त्वनिरासः क्षणभंगवादिबौद्धनिराकृतिश्चानायासेनैव ग्रन्थकृता निर्वर्त्यते जैनमतं चार्वाकमतं चातिदुर्बलमपि मन्दविषन्यायेन निराकरणीये एव। अत्र सर्वत्रापि ततन्मतप्रक्रियाः विचारणायां न सत्यतया निरूपयितुं शक्यन्त इतीयमेव युक्तिः पुरस्क्रियते। अतएव कर्ममीमांसकानां मतं द्वादशाध्यायानां विषयाश्च अनायासेनैव निराक्रियन्ते श्रीजनार्दनविदुषा। वेदान्तिनो हि व्यवहारे भट्टनय इति न्यायमाश्रित्य प्रायोः व्यावहारिकप्रक्रियायां भट्टमतमेवोररीकुर्वन्ति। तथाच तत्खण्डनं न तदभ्युपगमस्य दुष्टत्वेन अपितु तत्प्रक्रियायाः न पारमार्थिकत्वं स्वीकर्तुं शक्यते, व्यवहारे तु स्वीक्रियत एवेत्याशयेन। अतएव 'व्यवहारे' इत्युक्तम्।

ग्रन्थान्ते अविद्याया आश्रयविषयौ जीवन्मुक्तिः वेदान्तानामखण्डार्थता च सयुक्तिकं व्यवस्थाप्यन्ते।

व्यायमतस्य बौद्धजैनचार्वाकाणां च मतानि ब्रह्मसूत्रतद्भाष्यतट्टीकावाचस्पत्यादिषु खण्डितान्येव। तत्रानिराकृता न्यायशास्त्रविषयाश्च खण्डनखण्डखाद्ये तत्त्वप्रदीपिकायां च निराकृताः। अत्र तु न्यायमतखण्डनशैली अन्यादृशी सरला च। अत एवैतद्ग्रन्थस्य तत्तद्ग्रन्थैः अगतार्थता सिद्धा भवति। मीमांसामतद्वादशाध्यायविषयाणां दुर्निरूपत्वेन निराकरणं तु इदंप्रथमतयैव जनार्दनाचार्यैः कृतम्, अत एवायं ग्रन्थः अद्वैतरसिकाणां मनास्यावर्जयिष्यतीत्यत्र न कोऽपि संशयः।

केचित्त्वाधुनिकाः प्राहुः यदिमे अद्वैतिनः तार्किकादीनेव प्राचीनद्वैतिनः खण्डयन्ति नार्वाचीनद्वैतविशिष्टाद्वैतिन इति। नायं दोषावसरः, यस्मात् भाष्यभानुप्रभादिषु पराक्रान्त मेव त्र्यंबकशास्त्रिवर्यैः। अनन्तकृष्णशास्त्रिमहोदयैश्च शतभूषण्यादिषु।

वस्तुतस्तु अद्वैतसिद्धेः द्वैतमिथ्यात्वसिद्धिपूर्वकत्वात् अद्वैतवादिना द्वैतमिथ्यात्वनिर्वाहाय तत्खण्डनमावश्यकमेव। द्वैतिनां तु अद्वैतखण्डनमनावश्यकं अशक्यं च यतः अद्वैतिभिः द्वैतसिद्धः सर्वोऽर्थः व्यवहारेऽङ्गीक्रियत एव अशक्यत्वं तु अद्वैतस्य ब्रह्मरूपत्वात् ब्रह्मणश्चात्मत्वात् आत्मनश्च निराकर्तुमशक्यत्वादिति।

एतद्ग्रन्थमुद्रणायोपयुक्ते द्वे मातृके। एका पुनागत Bhandarkar Oriental Research Institute स्वभूता। अन्या वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनगता। उभे अपि प्रायः शुद्धे। पाठभेदश्च तत्तत्स्थलेषु दत्तः। उभयोः संस्थयोः स्वीयलिखितपुस्तकप्रदानेनोपकृतवतोः अस्मदीयं कार्तज्ञ्यं निवेदयामि। एतादृशामुद्रितपुस्तकानां मुद्रापणे दत्तानुमतीनां महामहिमशालिनां श्रीमुन्शीमहोदयानां संस्कृतप्रचारणे भारतीयसंस्कृतिप्रचारणे च निरतिशयः उत्साहः प्रसिद्ध एव। तेषामत्र कृतज्ञतां प्रदर्श्य विरमामि।

॥ श्रीः ॥

श्रीजनार्दनाचार्यविरचितः

वेदान्ततत्त्वालोकः

अथ प्रथमोऽध्यायः

। शास्त्रप्रामाण्यसमर्थने समवायनिराकरणम् ।

यच्च **कणभक्षाक्षचरणचरणप्रणामिनो** वर्णयांबभूवुः । धर्माधर्मनिबन्धनस्य सुखदुःखादिलक्षणस्य संसारस्यात्मनि समवायः सम्बन्ध इति । तदपि न घटामञ्चति । तत्र मानाभावात् । न तावदहं संसारीति प्रत्ययस्तत्र प्रमाणभावं भजते । अहं दण्डीत्यादावदर्शनात् । अथाहं संसारीति विशेषणविशेष्यभावः सम्बन्धनिबन्धनो जातिमद्विशेषणविशेष्यभावत्वात्, दण्डीति विशेषणविशेष्यभाववत् । स च सम्बन्धः परिशेषात्[1] समवाय इति । न, आध्यासिकसम्बन्धसंभवेन [2]गौरत्वादेरिव पारिशेष्यासिद्धेर्विशेषणविशेष्यभावस्य च प्रमातुमशक्यत्वेनाश्रयासिद्धिः ।

तथा हि—प्रमित एव धर्मी हेतोराश्रय इत्युदयनादेरुद्गारो दरीदृश्यते । अयञ्च विशेषणविशेष्यभावः किं द्रव्यादिष्वन्तर्भूतोऽनन्तर्भूतो वा प्रमीयते ? अन्तर्भावेऽपि किं द्रव्यादित्रिकेऽन्तर्भूतः सामान्यादित्रिके वा ? प्रथमे सामान्यादीनां नित्यत्वादिभिर्विशेषणविशेष्यभावो न स्यात् । द्रव्यादीनामनिष्टसामान्यादिनिष्ठतापातात् । चरमे सामान्यादेर्नित्यत्वेन तस्यापि नित्यतापातान्न कदाचित् संसारपरिक्षयः प्राप्नुयात् । अनन्तर्भूतत्वे च मूषकविषाणवदवस्तुत्वान्न प्रमासंभवः । स्वरूपमात्रे च विशेषणबुद्धेर्विशेष्यबुद्धेर्वाऽसंभवात् तद्बुद्धयोः परस्पराधीनसिद्धिकत्वेन नैकस्यापि सिद्धिः सञ्जाघटीति । किञ्च दूरस्थयोस्तरुगिर्योः स्वरूपसंदर्शनेऽपि सम्बन्धबोधविधुरतया विशेषणविशेष्यभावानवधारणात् सम्बन्धबोधाधीनं तदवधारणं तदधीनश्च सम्बन्धबोध इति परस्पराश्रयवज्रप्रहारो दुर्निवारः । किञ्च नैको विशेषणविशेष्यभाव उभयपरतन्त्रः संबोभवीति विशेषणे विशेष्यभावस्य विशेष्ये च विशेषणभावस्य [3]प्रवृत्तिदर्शनात् । अथैकं विशेषणं विशेष्यं चापरमित्ययमेव विशेषणविशेष्यभावः तर्हि तस्य सम्बन्धाधीनत्वसाधने संसारात्मानौ सम्बन्धाधीनावित्यसाधु साधितं स्यात् । तस्मान्न विशेषणविशेष्यभावसाधनावसेयः समवाय इति ।

---

(1) परिशेष्यात् का. (2) गुरुत्वा पु. (3) प्रवृत्त्यदर्शनात्. पु.

यदपरमनुममिरे **तार्किकाः** "इह घटे शौक्ल्यमित्यादाविहप्रत्ययः सम्बन्धनिबन्धनोऽबाधितेहप्रत्ययत्वात्। इह कुण्डे बदराणीतीहप्रत्ययवदिति, तदपि वाचालबालप्रलपितमित्यमलमतिभिरुपालभ्यते। शुक्लो घट इति सामानाधिकरण्यप्रतीतेरेव सार्वजनीनतया इहप्रत्ययस्य पारिभाषिकत्वेनाश्रयासिद्धेः, स्वरूपासिद्धेश्च, सम्बन्धाबाधेहप्रत्ययोः परस्पराधीनत्वेन प्रमित्यनुपपत्तेः।

किञ्च सिद्धं सम्बध्यतेऽसिद्धं वा? प्रथमे युतसिद्धिः प्रसज्येत। चरमे किं नाम सम्बध्येत? अपि चासौ सम्बन्धः सम्बन्धिभ्यां सम्बद्धोऽसम्बद्धो वा? असम्बद्धत्वे त्रयाणां विश्लेषोऽश्लिष्टःप्लवेत। सम्बद्धत्वे चानवस्थालतालूतिका लालगीति। अथ सम्बन्धस्य स्वपरनिर्वाहकत्वान्नेयमनवस्थेति। तत्रैतद्ब्रूवान् पृष्टो व्याचष्टाम्—केयं स्वपरनिर्वाहकता नाम? किं स्वव्यवहारे सजातीयपरनिरपेक्षता? अथवा स्वसम्बद्धोत्पत्तिहेतुता? आहोस्वित् स्वसम्बद्धत्वव्यवहारप्रवर्तकता? नाद्योऽनवद्यः। विश्लिष्टसमवायव्यवहारावतारात्[1]। नापि द्वितीयः, स्वसम्बद्धत्वोत्पत्तेः प्राग्विभागप्रसङ्गात्। तृतीये तु सम्बन्धान्तरवैधुर्येण स्वसम्बद्धताया नभस्तलनलिनायमानत्वात् कुतस्तद्व्यवहारप्रवर्तकता? कुतस्तरां तत्प्रवर्तकत्वेन परमार्थतः स्वपरनिर्वाहकतानिर्वहणम्। कुतस्तमामसम्बन्धसम्बन्धसिद्धः?[2]

यच्च समवायं लक्षयामासुः, अयुतसिद्धानामाधाराधेयभूतानामिहप्रत्ययहेतुर्यः सम्बन्धः स समवाय इति, तदपि चक्रकक्रकचसंपर्काक्रान्तं न स्वकार्यं चर्करीति। तथाहि—अयुतसिद्धानामाधाराधेयभावसिद्धाविहप्रत्ययहेतुत्वसिद्धिः, तत्सिद्धौ च समवायसिद्धिस्ततश्चायुतसिद्धसिद्धिरिति। तस्मात्सम्बन्धानिर्धारणान्नाध्यक्षसिद्धो बन्धसम्बन्ध इति तावत्सिद्धम्। **स्यान्मतं** आत्मा सुखादिमान् धर्माद्यधिकारित्वात्। न य एवं न स एवं यथा स्थाणुरित्यनुमानात् बन्धसम्बन्धाधिगतिरिति। तत्रापि तात्विकबन्धसम्बन्धानुमाने प्रागुपन्यस्तोपपत्त्यनुगृहीतासंसारित्वश्रुतिविरोधः। प्रातिभासिकबन्धसम्बन्धसाधने तु सिद्धसाधनम्। अधिकारित्वमपि ब्राह्मण्यादिजातिसम्बन्धाधीनं नात्मनि मयि प्रतीयत इति हेत्वसिद्धिः। मोक्षसाधनविधानान्यथानुपपत्तिरपि नात्मनि[3] संसारसम्बन्धसाधिका। संसारभ्रमापसरणार्थत्वेनापि साधनविधानोपपत्तेः। आगमश्च "तयोरन्यः पिप्पलं स्वाद्वत्ति" इत्यादिर्लोकसिद्धभोक्तृत्वानुवादेनान्यथैव[4] प्रवरीवर्तीति। तस्मात् प्रत्यक्षादीनामात्मनः संसारसम्बन्धासाधकत्वान्न तद्विरोधात् शास्त्रस्याप्रामाण्यमाशङ्कनीयमिति सिद्धम्।

(1) दुःस्थेयमवस्था—का.
(2) तमामनवस्थाऽदौस्थ्यम् का.
(3) न सत्यतः—का.
(4) अन्यत्रैव—का.

अध्यक्षेण मयाधुना ध्रुवमयं बन्धो न साधिष्यते
सम्बन्धोऽपि निरूपणं न सहते बोधात्मकस्यात्मनः ।
अद्धा शौद्धयमभाणि वेदशिरसा द्वैतं दनीध्वस्यते
स्वात्मन्येव तथापि कौतुकमिदं संसार्यहञ्चेति धीः ॥

। वेदापौरुषेयत्वसमर्थनम् ।

अपि च मानान्तराधीनविरचनपौरुषेयवचननिचयात्मनः[1] स्यादपि, तद्विरोधादप्रामाण्यशङ्काकलङ्कावकाशः, स्वाध्यायविध्यधीनतत्परापौरुषेयवेदशिरसां तु कथङ्कारं तद्विरोधेप्यप्रामाण्यं शङ्कितुं शक्यम्? निरस्ताशेषदोषशंकतया तत्र शूरत्वात् । कुतस्तर्ह्यपौरुषेयत्वसिद्धिः? उच्यते । तत्रैवमाचार्यवर्याः प्रायुञ्जत, वेदोऽपौरुषेयोऽस्मर्यमाणकर्तृकत्वादात्मवदिति । मुक्तकश्लोकेषु पौरुषेयत्वमवधारितञ्चेत् स्मृत एव कर्ता सामान्येनेति न व्यभिचारप्रचारः नावधारितञ्चेत्तर्हि न विपक्षता ।

यच्चावाचि जीर्णकूपारामादौ व्यभिचार इति । तदपि न चतुरचित्तानां चित्तमनुरञ्जयति । यतो निश्चित्य वाच्यवाचकतां विरच्यमानता पौरुषेयता विमतिगोचरः । सा च न जीर्णकूपारामादौ चकास्तीति कथंकारं व्यभिचारावसरः? ननु निश्चितेऽपौरुषेयत्वेऽस्मर्यमाणकर्तृकत्वनिश्चयः । तन्निश्चयाच्चापौरुषेयत्वनिश्चय इतीतरेतराश्रयात् सन्दिग्धासिद्धो हेतुः । नैतत्सारम्, कर्तुरनवधारणादेवास्मरणसिद्धेः ।

स्यान्मतं मुक्तकादिष्विव सामान्येनावधारितः कर्ता—वेदः पौरुषेयो वाक्यत्वात् कालिदासादिवाक्यवदित्यनुमानात् पौरुषेयत्वसिद्धिरिति चेत्, न । अस्यानुकूलतर्काभावात्, स्वाभाविकशक्तिवशात् संसर्गपरत्वेन वाक्यत्वम्, न तु पौरुषेयत्वाधीनमित्यप्रयोजकत्वात् । अथाप्तप्रणीतत्वमन्तरेण प्रामाण्यमेव नोपपद्यते । तथा च वेदप्रामाण्यं वक्तृगुणाधीनं वाक्यप्रामाण्यत्वादाप्तवाक्यप्रामाण्यवदिति जेगीयते । न, अर्थपरिच्छेदने सामर्थ्यस्य प्रामाण्यस्य स्वारसिकत्वाच्छब्दानां, परेषाञ्च प्रामाण्यस्य सामान्यरूपतया तत्र प्रामाण्यान्तरावृत्तेरपक्षतया हेतोरसिद्धिः । साध्यविधुरञ्चोदाहरणम् । आप्तत्वं चानाप्तसम्बन्धाधीनदोषशङ्कावैधुर्यायोपयोक्ष्यते । प्रयोगोऽपि-वेदःआप्तप्रणीतत्वानपेक्षप्रामाण्यः प्रमाणत्वात् प्रत्यक्षवदिति । तस्मादनुकूलतर्कविकलत्वात् सूक्तमप्रयोजकत्वम् ।

किञ्च पुरुषनिर्वर्त्यतामात्रं चेत्पौरुषेयत्वं सिषाधयिषितं तदा सिद्धसाधनम् । तथा हि—क्रमक्रोडीकृता वर्णाः वेदपदवेदनीयाः । क्रमश्चोच्चारणोपलब्ध्योरन्यतरवर्ती । स च प्रतिक्षणं निर्वर्त्यत इति तदवच्छिन्नानामपि निर्वर्त्यत्वं भवतेष्यते[2] । नचैतावता कर्तुः स्मरणम्, उपाध्याये वेदकर्तृत्वप्रसिद्ध्यभावात् । क्रमसादृश्यपरम्परायाश्चेदंप्रथमताऽनिरूपणान्नित्यता जेगीयते । हिरण्यगर्भप्रभृतीनां च कल्पादौ प्रादुर्भूतानां

(1) निचयस्य—का.
(2) आतिष्ठीयते—का.

परमेश्वरानुग्रहात्कल्पान्तरीयक्रमानुसंधानेन सुप्तप्रतिबुद्धन्यायेन वेदसंप्रदायप्रबोधकत्वात्[1] न कल्पादौ क्रमस्येदंप्रथमतोपपादनमुपपनीपद्यते। तथा च श्रुतिस्मृती "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति।

"कल्पान्तेऽन्तर्हितान्वेदान् सेतिहासान्महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा" इति।

परमेश्वरकर्तृकत्वमपि वेदस्य श्रूयमाणमुपादानत्वाभिप्रायेणोपपत्स्यते। तथाच "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदः" इत्याद्या श्रुतिर्निश्वसितशब्देनोपलभ्य विरचनां वारयति। तस्मात्सूक्तं पुरुषनिर्वर्त्यतामात्रसाधने सिद्धसाधनमिति। यदि प्रमाणेन वाच्यं निश्चित्य विरचना निश्चिकीर्ष्यते तदा कालिदासादिवाक्यानां केषाञ्चिदुत्प्रेक्षामूलत्वाकलनादनैकान्तिकता। अथोपलम्भमात्रपूर्वकत्वं तदा प्रामाण्यप्रसिद्ध्यनुपपत्तिबाधः। पुरुषान्तरोच्चारणनिरपेक्षत्वं नाम पुरुषस्य स्वातन्त्र्यं यत्र तत्पौरुषेयत्वमित्यनुवादेऽनेकान्त इति।

एतेनेदं अपास्तं-वैदिकवर्णानुपूर्वी पुरुषसंपाद्येदंप्रथमा वा वैदिकवर्णानुपूर्वीत्वात् संप्रतिपन्नवर्णानुपूर्वीवदिति। यच्च वेदवाक्यमाप्तप्रणीतं तद्विपरीतागमस्वीकारित्रैवर्णिकेभ्योऽधिकैस्त्रैवर्णिकैः प्रमाणत्वेनाद्रियमाणवाक्यत्वादायुर्वेदवदिति, तत्राप्तप्रणीतत्वे संदिग्धे प्रामाण्यानिर्धारणात्तार्किकाणां संदिग्धासिद्धो हेतुः।

वेदवाक्यमाप्तप्रणीतम् हेतुदर्शनशून्यमहाजनपरिगृहीतवाक्यत्वादायुर्वेदवदिति प्रयोगान्तरेऽपि चन्द्रप्रादेशत्वसूर्योदयादिवाक्ये व्यभिचारः। तस्मान्नाप्तप्रणीतो वेद इति स्थितम्। तर्हि वेदोऽनाप्तप्रणीत आप्ताप्रणीतवाक्यत्वादुन्मत्तादिवाक्यवदिति प्रसज्यते। मैवं मंस्थाः। पुरुषार्थानुबन्ध्यबाधितानधिगतवस्तुबोधाधायकत्वेनानाप्ताप्रणीतत्वावधारणविरोधात्। विपक्षबाधकानुकूलतर्कविरहात्, पुरुषधौरेयपरिग्रहाच्च।

यच्च प्रयोगान्तरं वेदोऽनाप्तप्रणीतःस्तोभाक्षरबहुलत्वाद्भुंडभाषणवदिति। तत्र भागासिद्धिः प्रसिद्धैव। स्तोभभागस्यैव पक्षीकरणेऽपि स्वाध्यायविधिपरिगृहीतवाक्यत्वादितरभागवदनाप्ताप्रणीतत्वावधारणान्नित्यतैव वेदस्येत्यवदातम्।

। शब्दानित्यत्वनिराकरणम् ।

यदपि **भूषणकारेणा**भाणि शब्दोऽनित्यः, सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वात् पटवदिति, तदप्यभद्रम्। ध्वनिभागे क्रमाक्रान्तभागे च सिद्धसाधनत्वाद्वर्णात्मकः शब्द इति पक्षे विशेषणकक्षीकरणेऽपि भागासिद्धो हेतुः, अन्तरालवर्तिनामप्रत्यक्षत्वाभ्युपगमादन्त्यस्यैव च पक्षीकरणे व्यर्थविशेषणता।

(1) चोदकत्वात्—का.

किञ्चास्मन्मते जातिष्वनैकान्तिकत्वं सन् घटः सन् पट इतिवत् सत्घटत्वं सत्पटत्वं सद्गोत्वमित्यनुगताकारप्रत्ययदर्शनात् स्वरूपाणि च परस्परपरावृत्तानि नानुगताकारप्रत्ययकारणतां प्रतिपद्यन्ते। अपरथा सर्वत्रैव तत्संभवात्सत्ताजातिः पाताले प्रलीयेत। न च सामान्यस्य सामान्यान्तराश्रयत्वेऽनवस्था अनावश्यकत्वाद्द्रव्यस्येव द्रव्यान्तराश्रयत्वे। न च सत्तायां सत्तान्तरप्रसङ्गः। गोत्वं गोत्वमिति प्रत्यययोरिव सत्ता सतीति प्रत्यययोरवैलक्षण्यात्।

यच्चेदमनुमानं शब्दोऽनित्यः तीव्रतादिधर्मोपेतत्वात् दुःखवदिति। तत्र भागासिद्धिस्तीव्रत्वादेः प्रत्येकमननुवर्तनात् व्यधिकरणासिद्धिश्च ध्वनेरेव तीव्रत्वादिधर्मोपेतत्वात्। यद्दूरादेव वर्णस्वभावमप्रतिपद्यमानस्य श्रोत्रपथमवतरति प्रत्यासीदतश्च वर्णेषु खरमधुरादिभेदं प्रसञ्जयति स ध्वनिरिति प्रसिद्धः।

तीव्रत्वादिधर्मविधुरवर्णानधिगमात्तद्धर्मकत्वसिद्धिश्चेत्। तर्हि गोत्वादेरपि खण्डादिधर्मकत्वप्रसंगः। व्यभिचारादतद्धर्मकत्वे समः समाधिः। कार्यत्वादनित्यत्वसाधने वेदवादिनं प्रत्यसिद्धिः। न च नित्यत्वे सदोपलम्भापातात्कार्यत्वं व्यञ्जकभावाभावाभ्यामुपलम्भानुपलम्भसिद्धेः।

यच्च विरचितं शब्दा न प्रतिनियतसंस्कारसंस्कार्याः। समानेन्द्रियग्राह्य समानदेशसमानधर्मापन्नत्वे सति युगपदिन्द्रियसम्बद्धत्वात्पटवदिति। तत्रानैकान्तिको हेतुः। सर्वगततया मनः संसृष्टानन्तात्मसु युगपदनुपलम्भेन प्रतिनियतव्यञ्जकव्यंग्यत्वावगमात्। अथ सर्वगतत्वेऽप्यसंसर्गः। तर्हि वर्णानामपि ध्वनौ प्रतिबिम्बितानामेव श्रोत्रसम्बन्धादसिद्धो हेतुः।

एतेन योग्यत्वे सत्यनुपलम्भादभावावगमः प्रत्युक्तः।

यदगाद्युदयनेन——वर्णात्मकाः शब्दाः आत्ममनोविषयसम्बन्धातिरिक्तसंस्कारनिरपेक्षेण श्रोत्रेण व्यज्यन्ते। श्रावणत्वात् ध्वनिधर्मवदिति, तन्न सदिति, तत्र सति वर्णसम्बन्धे व्यंजकनैरपेक्ष्यसाधने सिद्धसाधनम् सम्बन्धार्थत्वाद् व्यंजकस्य। किञ्च दर्पणस्य व्यंजकमन्तरेण चाक्षुषत्वं दृष्टमित्येतावता न प्रतिबिम्बस्य चाक्षुषत्वे नैरपेक्ष्यानुमानमित्यप्रयोजकतापि। तस्मान्नित्या वर्णाःध्वन्याद्यन्यत्वे सति श्रावणत्वाच्छब्दत्ववदिति स्थितम्।

। स्फोटवादनिराक्रिया ।

सति चैवं स्फोटकल्पनाप्यपार्थिका यावन्तो यत्क्रमकाश्च वर्णा वृद्धव्यवहारे यदर्थसम्बद्धतयोपलब्धास्तावतामेव व्यवहारान्तरेऽपि तदर्थप्रतिपादकत्वसंभवात्। निष्प्रमाणिका च। वर्णानामेव [1]तत्तद्बुद्धिजनकत्वोपाधौ पदादिबुद्धिविषयत्वात्। तरूणामिव वनबुद्धिविषयता। यादृक्क्रमावच्छिन्ना वर्णाः स्फोटं व्यञ्जयन्ति

(1) द्रव्यादि का.

तादृशा एवार्थव्यञ्जकाः [1]न पदत्वमापन्नाः। अतो नेतरेतराश्रयप्रसङ्ग इति।

श्रोत्रज्ञेयत्वमज्ञात्वा शब्दैकाकारधीर्यतः।
शब्दशब्दो वदेत्तस्माज्जातिं वर्णानुगामिनीम् ॥
अनन्तत्वादशक्यत्वाद्व्यक्तयः शक्त्यगोचराः।
लाघवाव्यभिचाराभ्यां जातयः शक्तिगोचराः ॥
व्यक्तयो व्यवहारार्हा लक्षणावर्त्मना पदात्।
औपाधिकस्तु द्रव्यादिर्जात्यभावे भवेद्बलात् ॥

। शब्दार्थसंबन्धस्य स्वाभाविकत्वनिरूपणम् ।

यदन्येनानुमिमे गवादिपदं संकेतपूर्वकमेव[2] व्यवहारपदम्, पदत्वात्संप्रतिपन्नवदिति,। तदचारु। वृद्धव्यवहारे प्रवृत्तिलिङ्गेन शक्तिमनुमाय व्यवहारान्तरे गवादिपदानां व्यवहार्यत्वस्य प्रत्यक्षत्वात्तद्विरोधात्। प्रयोगश्च-विमतं गवादिशब्दार्थसम्बन्धज्ञानं वृद्धव्यवहारपुरःसरं[3] गवादिपदार्थसम्बन्धज्ञानत्वादिदानीन्तनवत्। सर्गादौ चाद्यसंकेतकरणमस्येदं नामेतीदमा निर्देश्यैवेति सिद्धा स्वाभाविकी तस्य वाचकशक्तिः। न च तत्रानैकान्तः। तस्मात् पदानां पदार्थैस्तत्तद्बुद्धिजननसामर्थ्यलक्षणस्य सम्बन्धस्य स्वाभाविकत्वात्तदानुपूर्व्याश्चेदंप्रथमतोऽभावात्सिद्धं वेदस्य नित्यत्वम्, पुराणादिषु तु वाक्यरचनायाः पुरुषशेमुषीप्रसूतत्वात् पौरुषेयतेष्यत इत्यलम् ॥६॥

। शक्तिवादः ।

आश्रित्य भाविकीं शक्तिं वेदेऽवादि प्रमाणता।
वक्तारमनपेक्ष्यैव ततः साऽथ प्रसाध्यते ॥

ननु भावानामतीन्द्रियशक्तिसद्भावे किं मानम्? तत्रार्थापत्तिःप्रमाणमिति मेनिरे **कर्ममीमांसकाः**। तथाहि-करतलानलसंयोगे कदाचित्स्फोटोदयदर्शनात्तस्य तावन्मात्रादसंभवात् प्रतिबन्धदशायामपि प्रसक्तेरतोऽस्ति किञ्चदतीन्द्रियं व्यवस्थापकं सा शक्तिरिति गीयते। तत्राहु**र्नैयायिकादयः**—प्रतिबन्धकाभावेनैव दृष्टेन सहकारिणा व्यवस्थोपपत्तौ नातीन्द्रिया शक्तिः कल्पनीयेति। तत्राहुः——सत्यमेवं यदि प्रतिबन्धकाभावस्य सहकारित्वमकल्पेत न त्ववकल्पते। तथा सति प्रतिबन्धकशब्दार्थाभावापातात्। तथा हि—सति पुष्कलकारणे कार्योत्पादविरोधी प्रतिबन्धकः। इतरथा कारणाभावादेव कार्याभावोपपत्तेर्मन्त्रादिषु प्रतिबन्धकवार्ता न स्यात्। न च तदभावे तद्भाव इति प्रतिबन्धकत्वं मण्यादेर्न स्यात्।

(1) न—अधिकं. पु
(2) पूर्वकतयैव का.
(3) शब्दार्थ—का.

यदप्युदयनो जगाद–प्रतिबन्धो विसामग्री, तद्धेतुः प्रतिबन्धक इति–तदप्यलीकं विसाग्रीशब्दाभिधेयप्रतिबन्धकाभावाभावो हि प्रतिबन्धकभाव एव। न च स एव तस्य हेतुः, नचान्यस्य प्रतिबन्धकत्वप्रसिद्धिरस्ति।

किञ्च, सिद्धे प्रतिबन्धकाभावस्य कारणत्वे तद्वैकल्यापादकः प्रतिबन्धकः सिद्ध्यति। सिद्धे च तस्मिंस्तदभावः कारणमितीतरेतराश्रयं स्यात्। न च तस्य कारणत्वे मानम्। व्यतिरेकाभावात्, उत्तंभकसन्निधाने सत्यपि पूर्वमणौ कार्यदर्शनात्। यच्चाभाणि-उत्तंभकाभावविशिष्ट एव प्राक्तनो मणिः प्रतिबन्धक इति, तत्रेदं वाच्यम्। किं क्वचित्प्रतिबन्धके सति तत्संसर्गाभावः कारणम्? किं वा तस्यात्यन्ताभावः? आद्ये देशान्तरेऽप्युत्तंभकसंसर्गे वह्नेर्दाहो न स्यात्। अन्त्ये च क्वचित् प्रतिबन्धकेऽन्यत्रापि कार्यानुदयप्रसङ्गः। तस्मात् प्रतिबन्धकाभावस्य कारणत्वानुपपत्तेः कार्यभावा-भावसिद्धये प्रतिबन्धकव्यवहारसिद्धये च शक्तिरभ्युपगन्तव्या। तस्याश्च प्रतिबन्धे न दहत्यग्निरित्यादिव्यवहारालम्बना योग्यतापत्तिः, क्वचित्तु तन्नाशः, तैलकलुषित इव बीजे। अत एव न स्वभावप्रतिबन्धः। सति वस्तुनि तदपायायोगादिति ॥६॥

। ज्ञानानां स्वतः प्रामाण्यम् ।

शक्तेर्निसर्गसिद्धायाः सिद्धौ मात्वं निसर्गजम्।
अज्ञातज्ञापने शक्तिर्ज्ञानमात्वं यतो मतम् ॥
धारावाहिकविज्ञाने ह्यर्थो मेयोऽन्यकालगः।
प्रमाणासंप्लवोऽस्माद्वा ध्वंसध्वंसाप्तिभिन्नतः[1] ॥

यदत्र **वैशेषिकाः** कल्पयाञ्चक्रुः–प्रामाण्याप्रामाण्ये ज्ञानत्वावान्तरसामान्ये इति। तत्तावत्तेषां स्वमतपराहतं यतः प्रामाण्यं प्रमाणव्यक्तिसमवेतं प्रमाणव्यक्तयश्च प्रमासाधनभूताक्षसंप्रयोगप्रभृतयः। तत्र न ज्ञानत्वमन्वेति। यत्र चान्वेति प्रमायां तत्फलं फलसाधनयोश्च स्फुट एव भेदः। किञ्चाज्ञातार्थज्ञापकत्वोपाधावेव ज्ञानव्यक्तिषु प्रमाणपदवृत्त्युपपत्तौ न सामान्यकल्पनावकाशः। पाचकादिष्वनुपलम्भादिति।

। शंभुमतनिराकरणम् ।

यच्च **शंभुर्ब**भाणार्थे सत्येव भवनं प्रामाण्यं ज्ञानस्येति। तदप्यभद्रं, यतः सर्वत्र ज्ञानानुरूपोऽर्थोऽस्त्येव। अन्यथा ज्ञानत्वहानात् ज्ञायतेऽर्थोऽनेनेति हि ज्ञानं फल-लिङ्गानुमेयं च ते ज्ञानं फलञ्चार्थाश्रयं, ततः कथङ्कारमर्थविरहे ज्ञानमनुमीयते? कथंन्तमामेवकारेण वार्येत। किञ्चोत्पत्तिर्भवनं तदुत्पन्नस्य निवृत्तमिति सत्ताक्षणे प्रामाण्यं न स्यात्। तस्मादज्ञातज्ञापने शक्तिर्ज्ञानस्य प्रामाण्यमित्येतदेव भगवतो भाष्यकारस्य मतमनुसरणीयम्। तज्ज्ञैरप्यभाणि।

---

(1) ध्वान्तध्वंसाप्तिभिन्नतः–का.

स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम् ।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते ।। इति ।

किं तर्हि तत्स्वतत्स्वे प्रमाणम् ? प्रामाण्यं स्वधर्मिकारणमात्रजन्यम्, तन्मात्रान्वयव्यतिरेकित्वात् स्वधर्मिवदिति ब्रूमः। विपक्षे चान्वयव्यतिरेकाभ्यां कार्यकारणभावानवधारणप्रसङ्गः। न च हेतोरसिद्धिः, दोषाभावस्य प्रतिबन्धकाभावस्य प्रतिबन्धकाभावत्वेन प्रागेव कारणतानिराकरणात्तदन्वयव्यतिरेकयोश्च वह्निपैङ्गल्यान्वयव्यतिरेकवद्धेतुत्वासाधकत्वात् । तस्मादिन्द्रियादिस्वरूपमेव ज्ञान इव तत्प्रामाण्ये च कारणम् । न च कार्यभेदः सामग्रीभेदव्याप्त इति कालात्ययापदिष्टतोद्घाटनीया, तार्किकैरप्येकस्मादेव वह्निसंयोगाद्रूपरसगन्धस्पर्शदाहानामभ्युपगमात् । न च तत्तत्प्रागभावस्यापि कारणत्वात्सामग्रीभेदः, तस्यान्वयव्यतिरेकित्वाभावात् । कः खल्वयं प्रागभावस्याभावः कार्यादन्यो यस्मिन्सति कार्याभावो ज्ञायेत ? पूर्वोत्तरभावनियमोऽपि भावाभावयोः सहस्थितिविरोधादेवान्यथासिद्धः । ततो न कार्यभेदात्सामग्रीभेदानुमानम् ।

। उदयनोक्तपरतः प्रामाण्यसाधकयुक्तिनिरासः ।

यच्चापरमुदयनोऽचूचुदत्-ज्ञानकारणमात्राधीनं चेत् प्रामाण्यमप्रमापि प्रमा स्यादिति, तदपि कुचोद्यमेव । यतः स्वधर्मिकारणमात्रजन्यता प्रत्यज्ञायि । केचित्तु शुक्तेः स्वाभाविकशुक्त्यात्मत्वसद्भावेऽपि दोषोत्थरजतात्मत्वावभासवत् संप्रयोगप्रसूतपौरस्त्यवस्तुप्रत्ययस्य स्वाभाविके प्रामाण्येऽपि दोषोत्थान्यथाभासकत्वसंशयात्मकत्वयोः समारोपोपपत्तिः, बाधाच्च तदनुभव इति परतस्त्वमप्रामाण्यस्य जेगीयते । स्मृतिस्तु पूर्वदृष्टार्थमात्रस्फुरणं न प्रमाणं नाप्यप्रमाणमिति **भट्टपादीयाः**। **वेदान्तिनस्तु** स्मृतिसंशयविपर्यासादीनामविद्याविवर्तार्थाभासगोचरणामज्ञानवृत्तित्वाभ्युपगमात् नास्ति प्रामाण्यमिति मन्यन्ते । ज्ञानत्वारोपाच्च ज्ञानात्प्रवृत्तिरित्यपि न व्यभिचरति । सर्वथापि तावत्स्वतः प्रामाण्यं परतोऽप्रामाण्यमिति भट्टपादादयो वेदविदः प्रतिपेदिरे ।

यच्चेदमनुमानं–प्रामाण्यं प्रमाणाप्रमाणसाधारणकारणातिरिक्तकारणजन्यं ज्ञानत्वन्यूनवृत्तित्वादप्रामाण्यवदिति, तत्र तावत् ज्ञानकारणमात्रान्वयव्यतिरेकविरोधः । ईश्वरज्ञानप्रामाण्ये च परेषां व्यभिचारोऽस्मन्मतानुसारेण चासिद्धिः । तस्मात्सिद्धं मात्वस्योत्पत्तौ स्वतस्त्वम् । ज्ञानसमानज्ञापकत्वं ज्ञप्तौ स्वतस्त्वं तदप्यविरुद्धम् । फलं स्वानुकूलातिशयवत्कारणपूर्वकं कार्यत्वात् यदेवं तदेवम् यथा स्वानुकूलतैक्ष्ण्यातिशयवत्परशुपूर्वकं वनच्छेदनमिति शक्तिमत एव ज्ञानस्यानुमानात् । साक्षिवेद्यत्वाच्च[1] ज्ञानोदयमात्राच्चास्मत्पक्षे[2] प्रवृत्त्युपपत्तिः । कदाचिद्दोषात्संशयोऽप्यविरुद्धः,

(1) त्वाद्वा–का.
(2) अस्मिन् पक्षे का.

संशयादिमलनिरासाय च रूपकपरीक्षादौ ज्ञानान्तराणि उपयुज्यन्ते[1]। प्रयोगश्च प्रामाण्यं स्वतो ज्ञायते। ज्ञानैकधर्मत्वात्ज्ञानत्ववदिति। ये तु **सुगतनैयायिक** प्रभृतयो मेनिरे परतस्त्वं, तेषामनवस्था सुस्थितैवेत्यलं कलकलेन।

वेदे मात्वमसाधि वक्तृविरहाच्छब्दे च शक्तिः स्वतः
तस्मादेव समस्तदोषविकलो वेदो दरीदृश्यते।
तेनोक्तं तव सूतकित्वमभया ब्रह्मात्मता चानयो-
राशौचं स्वगतं प्रवेत्सि परतां कस्मान्न बोबुध्यसे ॥७॥

। वेदानां सिद्धार्थे प्रामाण्योपपत्तिः ।

मानान्तराविरुद्धार्थनित्यवेदगिरामपि।
विधिशेषत्वतः केचिद्भूते मात्वं न मेनिरे॥

तत्र ब्रूमः—किं विधिसंस्पर्शमन्तरेण प्रामाण्यमेव नोपपनीपद्यत इति तत्परत्वं श्रुतिशिरसामुररीक्रियते ? किं वा वृद्धव्यवहारे सर्वेषामेव पदानां कार्यपरत्वावधारणादिति। नाद्यो घटाकोटिमाटीकते। यतो येषां पदानां यस्मिन्नर्थे शक्तितात्पर्ये तेषां तत्र प्रामाण्यम्। न तु विधिसंस्पर्शकृतम्।

जर्तिलयवाग्वा वा जुहुयादित्यादेरपि स्वार्थे मात्वापातात्। अतो वेदान्ताः स्वार्थे प्रमाणं तत्परत्वादग्निहोत्रादिवाक्यवदिति। नासिद्धो हेतुः तात्पर्यलिङ्गानामवगमात्।

। वेदान्तेषु सिद्धे ब्रह्मणि षड्विधतात्पर्यलिङ्गोपपत्तिः ।

तथाहि छान्दोग्ये षष्ठे प्रपाठके—"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यद्वितीयेनोपक्रम्यैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीत्यद्वितीयेनैवोपसंहारात्। मध्ये च तत्त्वमसि तत्त्वमसीति नवकृत्वोभ्यासान्मानान्तरानधिगतस्य चाद्वितीयात्मनः प्रतिपादनात्। आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति फलसंकीर्तनात्, तथा सृष्टिस्थितिप्रलयाद्यर्थवादोपादानात्, तथा मृदादिदृष्टान्तैरद्वितीयस्यात्मनो युक्तिभिरुपपादनात्तस्य तावदद्वितीयात्मन्येव तात्पर्यमवधार्यते। तथा वेदान्तान्तरेऽपि उपक्रमोपसंहारैकरूप्याभ्यासापूर्वताफलवत्तार्थवादयुक्त्युपपादनानि षडपि तात्पर्यलिङ्गानि विकल्पेन समुच्चयेन वा द्रष्टव्यानि। तात्पर्यं नामानेनात्र भवितव्यमित्यप्रतीतार्थग्राहकत्वं शक्त्यतिरिक्तः शब्दधर्मः। तस्योक्तरीत्यावगमान्न हेतोरसिद्धिः। किञ्च विधिपरत्वे श्रुतिशिरसां द्वाराभावान्न तत्परता वक्तुं पार्यते। न हि कर्ता वेदशिरस्सु प्रतिपाद्यते तस्य लोकत एव सिद्धत्वात्। किन्तु तदनुवादेन निरस्ताशेषवर्णाश्रमादिविशेषं विशुद्धब्रह्मात्मतत्वं; न च तत्कर्म-

(1) उपयोक्ष्यन्ते का.

सूपयुज्यते। प्रत्युत श्रुतिरपि तादृशी विध्यधिकारं निरुणद्धि। तस्मात्तात्पर्यलिङ्गानुपलम्भेऽपि न विधिशेषत्वकल्पना कल्पते। किमङ्ग पुनर्भूतेऽद्वितीयब्रह्मात्मनि तात्पर्यलिङ्गेषूपलभ्यमानेष्विति नाद्यो निरवद्य इति स्थितम् ॥८॥

। वेदान्तानां अन्वितमात्रे शक्तिसाधनम् ।

नापि द्वितीयः। सकलपदानामन्वितमात्रधीजनने वृद्धव्यवहारेपि सामर्थ्यावधारणात्। तथा हि—चैत्र, चन्दनमानयेति वचननिचयनिश्चयानन्तरं चैत्रस्य चेष्टां दृष्ट्वा बुद्धिपूर्वेयमस्य चेष्टा स्वतन्त्रचेष्टात्वान्मदीयचेष्टावदित्यनुमायान्वयव्यतिरेकाभ्यां पार्श्वस्थो व्युत्पित्सुरन्वितमात्रधीजनने शक्तिं शब्दानामधिगच्छति। न कार्यमात्रधीजनने, तावन्मात्रज्ञानस्य प्रवृत्त्यहेतुत्वात्, न हि पदार्थमात्रज्ञानस्य प्रवर्तकत्वं दृष्टचरम्, किन्त्वन्वितपदार्थज्ञानस्य, तत्र कार्यान्वित इति विशेषणे गौरवप्रसंगः। चेष्टानुकूलत्वेन कार्यविशेषणे प्रयत्नादेरपि व्युत्पत्तिगोचरत्वप्रसङ्गात्। कार्यपदातिरिक्तानाञ्च पदानां कार्यान्विताभिधायित्वं कार्यपदस्य तु कार्यान्तरासंभवेन न कार्यान्विताभिधायित्वमिति प्रयोजकद्वैविध्यं प्रसज्यते।

। कार्यान्विते शक्तिनिराकरणम् ।

यश्च कश्चिद्विपश्चिदवोचत्। सकलपदानां कार्यान्वयान्वयिनि सामर्थ्यमित्येकमेव प्रयोजकमिति, तदपि बकबन्धनवदवभासते। अन्वयिनि सामर्थ्यमित्येतावन्मात्रे प्रयोजके संभवति कार्यान्वयविशेषणवैफल्यात् कार्यान्वययोश्च युगपद्विशेषणत्वेन विशेष्यत्वेन च गुणप्रधानभावप्रसङ्गात्। तस्माल्लाघवतर्कसाहाय्यादन्वितमात्रधीजनने व्यत्पित्सुर्व्युत्पत्तिं प्रतिपद्यते। ननु तर्ह्यत्यन्तलाघवाय स्वरूप एव शक्तिरस्तु। न तावदिदं गुरुमतानुसारिणां शोभते। अन्विताभिधानवादित्वात्। अभिहितान्वयवादिनां च संसर्गबुद्धेरशाब्दत्वप्रसङ्गः। शब्दावगतपदार्थनिबन्धनत्वाच्छाब्दत्वे लैङ्गिकस्यापि प्रत्यक्षत्वप्रसंगात्। प्रथमावगतसंसर्गपरतायास्त्यागप्रसंगाच्च। मध्ये च पदार्थशक्तिकल्पने गौरवाद्युगपत्सर्वप्रतीत्यादिदूषणस्य चेतरत्र समानत्वात्। सहकारविशेषापेक्षायाश्च समानत्वाद्वाक्यार्थप्रतीतिनान्तरीयकत्वेन पदार्थान्वयव्यतिरेकयोरन्यथासिद्धत्वात्।

पश्यतःश्वेतिमारूपं हेषाशब्दञ्च श्रृण्वतः।
खुरनिष्पेषशब्दञ्च श्वेतोऽश्वो धावतीति धीः।

इत्यत्रापि संसर्गबुद्धेरनुपपत्तिप्रसूतत्वात्। तस्मात्क्रमेणोच्चार्यमाणेषु पदेषु संस्कारभूयस्त्वादव्यभिचारिणः पदार्थाः प्रथमं प्रतीयन्ते। पश्चात्तान्येव स्मृत्यारूढानि तेषामेवान्वयं प्रतिपादयन्तीत्यन्विताभिधानमेव युक्तम्।

प्रयोगोऽपि-विप्रतिपन्नो व्युत्पत्तिगोचरः प्रमेयत्वादुभयाभिमतप्रमेयवदिति। न च व्यक्तावनैकान्तिकत्वम्, तस्यापि स्वशब्दव्युत्पत्तिगोचरत्वात्। ननु तत्र व्यक्तित्व-

जात्यभावात् कथं व्युत्पत्तिरिति चेत्, न, दण्ड्यादिवदौपाधिकत्वात्। तदभावेऽपि व्युत्पत्तिसंभवात्। न च व्यवहारादेव संगत्यवगतिनियमः। पुत्रस्ते जात इत्यादौ वदनविकसनादिना हर्षाद्युत्पादानुमानेन सामान्येन तत्कारणप्रतीतिमात्रजनने सामर्थ्यमधिगम्य प्रयोगान्तरेष्वावापोद्धाराभ्यां विशेषेऽपि व्युत्पत्त्युत्पत्तेः। संशयस्य च व्यवहारेऽपि समानत्वात्, किमयं श्रुत्या प्रवृत्तः? किं वा बुद्ध्येति। न च पराभिमतं कार्यं तत्वतोऽस्ति अनिरूपितप्रमाणत्वात्। न तावन्ममेदं कार्यमिति धीश्चकीर्षामात्रोल्लेखात्। फले तत्साधने च चिकीर्षागोचरतातिरेकिणी कृत्युद्देश्यता भातीत्यत्र ते कोशपानमेव मानम्। न च वैदिकलिङादिः पराभिमतकार्यबोधकः, तत्रागृहीतसंगतित्वात्पदान्तरवत्। न च स्वर्गकामपदसमभिव्याहारात् प्रतीतिसंगत्यधिगतिः, क्रियाया एवेश्वरद्वारेणावान्तरापूर्वद्वारेण वा कालान्तरीयफलसाधनत्वसंभवात्। आग्नेयादीनां प्रधानापूर्वसाधनत्ववत् अनुपपत्तिगम्यत्वे चापूर्वत्वानुपपत्तिः। न च तदुत्थं ज्ञानं तर्कोऽबाधितासंदिग्धाज्ञातार्थत्वात् पटज्ञानवत्। न चासिद्धत्वाद्भाविन्यपेक्षा चक्रकापत्तेश्च पूषादिपदानामनन्यगतित्वात, लौकिकस्याप्यत्र संभवात्। अतो लिङाद्यर्थः कृतियोग्यमिष्टसाधनमेव न नियोगः॥ २०॥

नापि भावनाद्वयम्, बालेनानाकलितत्वात्, दृष्टपरिहारेणादृष्टकल्पने कारणादर्शनाच्छब्दस्य परिस्पन्दादिव्यापारानिरूपणाद्युगपत्क्रमेण वोभयाभिधानायोगात् प्रवर्तकत्वसामान्याभिधाने परिशेषाच्छब्दव्यापारस्याश्रयत्वकल्पने वैदिकस्य लिङादेरप्रामाण्यापाताच्छब्दव्यापारे प्रवर्तयत्यपि समीहितसाधनतावगममन्तरेण बुद्धिपूर्वकारिणामुपेक्षणीयवचनादिवत् प्रवृत्त्यनुपपत्तेरन्वयव्यतिरेकसिद्धं कृतियोग्येष्टसाधनस्यैव प्रवर्तकत्वं, आज्ञादेरपीष्टसाधनत्वानुबन्धेनैव प्रवर्तकत्वं तदभावेऽभावात्।

न च व्याकरणेनाज्ञादिव्यापारेषु लोके संगतिः, वेदेऽपि प्रसंगात्, असंभवादनङ्गीकारे गौरवाल्लोकेऽपि नादर्तव्यम्। लाक्षणिकार्थभेदपरं तु सूत्रम्। वैदिकलिङादयो व्यापारबोधका लिङादित्वाल्लौकिकवदित्यप्यमानम्, साध्यवैकल्यात्। कारकत्वाद्व्यापारवत्त्वानुमाने, व्यापारानुपलब्धिबाधः। स्वाधारे ज्ञाततातिशयाङ्गीकारान् सिद्धसाधनम्। लिङ्गे च व्यभिचारः। प्रवृत्तिहेतुत्वात्तदनुकूलव्यापारवत्त्वानुमाने-चासिद्धिः, अयस्कान्ते चानेकान्तः। काम्यनित्यभेदोऽपि साध्याधिकारिविशेषणभेदादुपपन्नः। तदेवं वृद्धव्यवहारानुसारेण कर्मकाण्डमपि पराभिमतकार्यविपरीते प्रमाणम्, किं पुनर्ब्रह्मकाण्डम्? प्रयोगोऽपि-वेदः सिद्ध एवार्थे प्रमाणं प्रमाणत्वात् प्रत्यक्षवदिति॥२०॥

लोके सिद्धे प्रसिद्धा पदनिचयगता संगतिः पुत्रकादौ,
वेदान्तेऽप्यत्र दृष्टा सकलपदगताशेषता प्रक्रमाद्यैः।
कार्यं नो तत्त्वमादौ प्रविदितमधुना कल्पनं निष्प्रमाणं
तस्मात्सिद्धाऽद्वितीये स्वमतचितितनौ मानता तत्त्वमादेः॥

श्रीमदनुभूतिस्वरूपाचार्यशिष्येण विद्वद्वृन्दपदारविन्दप्रणतकन्धरेण श्रीमता जनार्दनेन विनिर्मिते **तत्त्वालोके** प्रथमोऽध्यायः॥

अथ द्वितीयोऽध्यायः

। तत्पदार्थविचारः ।

ननु वेदान्तमानत्वे स्वार्थे ज्ञातेऽपि मानतः ।
तत्पदार्थापरिज्ञानान्न वाक्यार्थे प्रमा मम ॥

अत्राभिदध्महे—"सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीय" मिति प्रक्रमात्तत्पदस्य च प्रकृतपरामर्शित्वात्। प्रकृतं च सदद्वितीयं जगन्निमित्तोपादानं तत्पदेनाभिधीयते। तत्रोचुः **कणादादि**पादारविन्दषट्पदाः-तत्पदस्य सर्वनाम्नः स्वमहिम्ना प्रसिद्धावद्योतकत्वात्। निमित्तकारणस्य चेश्वरस्य स्वातन्त्र्येणानुमानात् प्रसिद्धत्वात्तदनुवादकं तत्पदमिति। तदीश्वरस्वरूपावधारणबिधुराणां प्रयासमात्रमित्युपहसन्त्यौपनिषदाः। स्वातन्त्र्येणेश्वरस्यानुमानानवगाह्यत्वात्।

। ईश्वरस्य अनुमानावेद्यतानिरूपणम् ।

तथाहि-धूमजातीयमग्निजातीयेनाविनाभूतं भूयोदर्शनसंस्कारसध्रीचीनाक्षसंप्रयोगेण गृहीतमिति पर्वते धूमजातीयो दृष्टः स्वव्यापकसम्बन्धं पर्वतस्य गमयति पक्षधर्मताबलात्। न तथा कार्यमात्रस्य तद्विशेषस्य वा सर्वज्ञाशरीरिकर्त्रा व्याप्तिः क्वाप्युपलब्धा। अतः पक्षधर्मताबलादपि पृथिव्यादेः कार्यता कथङ्कारं सर्वज्ञाशरीरिकर्तृत्वं साधयेत्। विमतं सकर्तृकं कार्यत्वात्कुम्भवदिति सिद्धसाधनम्। यथाशब्दं ह्यनुमाने साधनदूषणे नाभिप्रायवशात्। अन्यथा प्रसिद्धिध्वंसात्। कर्तृजन्यतापि तथा, अदृष्टद्वारेण जीवजन्यत्वात्। अङ्कुरादीनाञ्चानन्तानामेकप्रमाणाविषयत्वात्संभूयकारित्वाभावाच्चाश्रयासिद्धिः। सर्वं ब्रह्मेति वदतां सृष्टेर्व्याजमात्रत्वात्। कार्यत्वं सप्रतियोगिकं तन्निश्चयं विना न निश्चीयते भेद इव प्रत्यक्षेणातः संदिग्धासिद्धो हेतुः। कारणान्तरेण नैराकांक्ष्ये चाप्रयोजकत्वम्। सावयवत्वं द्रव्यान्तरसमवेतत्वं कारणे संदिग्धे संदिग्धमिति न कार्यत्वसाधकम्, मध्यमपरिमाणवत्त्वञ्च विचारासहमेव चेत्साधनमपसिद्धान्तः। तत्सहञ्चेत्सिद्धं संबध्येत, असिद्धं वा? नोभयथापि। धूमवत्त्वमपि नो विचारासहमेवेति न साम्यम्। कार्यत्वञ्च प्रागसतः सत्तासमवायादिणलक्षम्, तदितरेतराश्रयान्न निश्चेतुं शक्यम्। न चौपनिषदं प्रति विद्युदादिप्रतिबन्दीग्रहः। तस्मान्न कार्यानुमानं साधीयः।

यच्चोवाच, अनुमानात्कर्तृमात्रं सिद्ध्यति सर्वज्ञत्वादिकं तु तस्यानुपपत्तिलभ्यमिति, तदसुन्दरम्। कतिपयपरिचयमात्रेणापि कर्तृत्वोपलम्भात्। न हि कुम्भकारोऽदृष्टं तन्निमित्तं ज्ञातुमीष्टे। नापि मधुधारणादिप्रयोजनविशेषम्, नापि क्रेतृपुरुषविशेषं; नाप्येकत्वम्, बहुकर्तृकस्यैव प्रासादादेरुपलम्भान्महतः, कल्पनालाघवानवतारात्। एकस्य शरीरादिरहितस्य नित्यज्ञानेच्छाप्रयत्ना इति परस्यैव गरीयसी कल्पना।

। आनुमानिकस्येश्वरस्य प्रमातृत्वाद्यसंभवः ।

किञ्च यथा पचिक्रियायोगात् पक्ता तथा कृतियोगात् कर्ता। अतः पक्षधर्मताबलेन कृतिमत्सम्बन्धे सिद्धेऽपि प्रमातृसम्बन्धः कथं सिद्ध्यति। भ्रान्त्युत्प्रेक्षापूर्वककृतिमत्त्वस्य कुलालादावेवः बहुलमुपलम्भात्। अथोपादानसाक्षात्काराधीनकृतिमत्त्वं कर्तृत्वं तर्हि शब्दोपादानसाक्षात्कारानभ्युपगमादस्माकमनेकान्तः। न च तस्यापि पक्षता अनादिप्रसिद्धकर्तृकादन्यत्सकर्तृकमित्युदयनोद्गारात्। तत्राप्युक्तविधकर्तृकत्वसाधने प्रत्यक्षविरोधोऽनुपलब्धिविरोधो वा; यथा विमतं नरशिरः श्रृङ्गी शिरस्त्वात् संप्रतिपन्नवत्, इत्यत्रायोग्यत्वात् अनुपलभ्यमानस्यापि सदनुमानतापातः। श्रृङ्गत्वाद्योग्यत्वे कर्तृत्वादित्येवोत्तरम्। न च कर्ता प्रत्यक्षागोचरो व्याप्तिग्रहणाभावप्रसंगात्। ननु पर्वते वह्निसाधनमप्यनुपलब्धिबाधितं स्यात्। न, प्रत्यक्षोपलब्ध्यभावेऽपि कार्यस्य निष्कारणकत्वप्रसंगतर्कप्रसूतोपलब्धिसंभवात्, नेह तर्कस्याप्यवसरः, परिदृष्टानेककर्त्रा नैराकांक्ष्यात्। किञ्च भवदुक्तकर्तृलक्षणे प्रलयस्य कुंभादिप्रध्वंसस्य चाकर्तृकत्वप्रसङ्गः।

अथ भावकार्यस्योक्तविधकर्तृकत्वोपलम्भात् क्षितिरित्यादेरपि तदनुमानम्? तर्हि शरीरिपूर्वकत्वस्याप्युपलंभात् तदपि किं नानुमीयते? न चैतत्सावयवत्वमपि स्यादितिवत् जातिमात्रं, सर्वत्राव्यभिचारात्। सावयवत्वं तु क्रियादौ व्यभिचरतीत्यसदुत्तरम्। तस्मादतीन्द्रिये त्वद्दृष्टं किञ्चिदेवानुमातव्यं न मद्दृष्टमिति नियामकाभावात् नानुमानात् सर्वज्ञकर्तृकत्वनिश्चयः। यत्तु प्रयोगान्तरं अयं-घट एतज्जनकानित्येतरज्ञानजन्यः कार्यत्वात् पटवदिति, अत्र विपक्षबाधकतर्काभावात्। अयं घट एतज्जनका गर्दभेतरजन्यः, कार्यत्वात्पटवदित्यतिप्रसंगलक्षणप्रतिकूलतर्कपराहतत्वाच्चाप्रयोजकत्वं वाच्यम्।

यच्च व्यतिरेकि-क्षित्यादि सर्वज्ञकर्तृकं कार्यत्वान्न यदेवं न तदेवं यथा नभ इति, तत्र सर्वज्ञकर्तृकत्वाभावप्रमितेः सर्वज्ञप्रमितिसापेक्षत्वादितरेतराश्रयपाशपाशितत्वेन व्यतिरेकानवधारणमिति संदिग्धानैकान्तिकत्वं, न ह्यस्माकमिव **तार्किकाणां** प्रसिद्धिमात्रात् व्याप्त्यध्यवसायः। किञ्चाप्रसिद्धविशेषणः पक्षः, अन्यथा शशविषाणकर्तृकत्वप्रसाधनेऽपि व्यतिरेकिणो निवारकानुपलम्भात्, नायमपि निश्चायक इत्यलम्। तस्मात्केवलनिमित्तकारणस्येश्वरस्य स्वातन्त्र्येणानुमानादप्रसिद्धत्वान्न तत्प्रसिद्धानुवादि तत्पदम्; किन्तु प्रकृतगाम्येवेति स्थितिः[1]।

भजामि शंभुं भवभीविदारणं जगत्प्रसूतिस्थितिनाशकारणम्।
विधूतभेदं निरवद्यमाद्यं परं पदं वेदशिरस्सु वेद्यम्॥ १२॥

(1) स्थितम्–का.

। परमाणुकारणत्वनिराकरणम् ।

यत्तु वावदीति **काणादः**—परमाणुश्च कारणम्, तस्मादीश्वरमात्रस्य कारणत्वं न संमतम्। तत्राभिधीयते— न तावन्नित्याः परमाणवः सन्ति मानकलाविकलत्वात्। कुतस्तरां तेषामारम्भकत्वम्? कुतस्तमां तदवष्टंभेन निमित्तोपादानभेदापादनमुज्जृम्भते? तथाहि— यत्तावदल्पपरिमाणतारम्यं क्वचिद्विश्रान्तम्, परिमाणतारतम्यत्वान्महत्परिमाणतारतम्यवदिति, तत्र तारतम्यस्य दुर्निरूपत्वादाश्रयासिद्धिः। न तावत्तारतम्यं जातिः, उत्कर्षादिमत्त्वात्। नापि गुणः परिमाणस्य निर्गुणत्वाभ्युपगमात्, नापि धर्मो नाम वैशेषिकाणां प्रसिद्धः षट्पदार्थातिरेकी, धर्मत्वे च तारतम्यस्य स्वधर्मिणि परिमाणे विश्रमसंभवात् सिद्धसाधनम्। हेतोः पक्षधर्मत्वेनावर्त्तनात्स्वरूपासिद्धिश्च।

यदप्यगादि विमतं सावयवं स्वपरिमाणादल्पतरपरिमाणारब्धम्, सावयवत्वात्पटवदिति; तदप्यसुन्दरम्; दीर्घदुकूलारब्धरज्जुद्रव्ये व्यभिचारात्। न च दुकूलानामन्त्यावयवित्वादनारम्भकत्वम्; परस्पराश्रयात्। द्वितन्तुकरज्जुद्रव्यस्याप्यपह्नवप्रसंगः। तत्रापि संयोगमात्रं भातीति वक्तुं शक्यत्वात्। अतोऽन्त्यावयवित्वस्य परिभाषामात्रत्वात् सूक्तमनैकान्तिकत्वम्।

यच्चेदं गदितम्—अयं कुंभ एतद्व्यतिरिक्तकार्येतरमूर्त्तान्योन्याभाववान् कार्यत्वात् स्तंभवदिति। तत्र कार्येतरमूर्तस्य विशेषणस्यासिद्धौ विशिष्टासिद्धयप्रसिद्धविशेषणते। स्वतो वाऽन्योन्याभाववत्त्वप्रसङ्गः। विपक्षबाधकाभावाच्चाप्रयोजकत्वम्।

। परमाणूनां निरवयवत्वम् ।

यच्चेदं नित्यत्वसाधनं नित्याः परमाणवो निरवयवद्रव्यत्वादात्मवदिति। तत्र विशेषणासिद्धो हेतुः। तथा हि—परमाणवः सावयवाः संयोगित्वात्पटवदिति। आत्मादीनां चासंयोगित्वान्नानैकान्तिकत्वम्, तेषामपि च स्वरूपेण संयोगित्वे संयुक्तस्वरूपत्वव्यतिरिक्तस्वरूपान्तरासंभवात् एक एव संयोगःस्यात्। विपक्षबाधकञ्च। संयोगस्याव्याप्यवृत्तित्वेन युगपदेकोपाधावेकस्य भावाभावप्रसंगः। यच्च कल्पितैः प्रदेशैः संयोगित्वसंभवात्सिद्धसाधनत्ववर्णनम्; तत्स्वाभिमतविरुद्धम्, समवायिकारणस्यासत्यत्वप्रसंगात्तस्मात्सूक्तं संयोगित्वे सांशत्वमिति।

ननु ये परमाणावंशास्त एव मे परमाणवः, तेषामपि सांशत्वे तदंशा भविष्यन्ति। विद्यमानेष्ववयवेषु यतः परं विभागो नास्ति सः परमाणुरिति तल्लक्षणात्। तत्रैतद्वक्तव्यम्—किमस्मदादिभिरविभाज्यमानावयवत्वं परमाणुलक्षणम्? किं वा सर्वथैव विभागायोग्यत्वम्? प्रथमे दीर्घपरिमाणतन्तुद्वयारब्धह्रस्वपरिमाणवर्तिवत् अनणु-

परिमाणद्रव्यद्वयारब्धं किमप्यणुपरिमाणं भविष्यतीति कुतस्तस्य निरवयवत्वादिसिद्धिः? चरमे सन्मात्रत्वात्तद्ब्रह्मैवेति तस्य निरवयवत्वादिसाधने न कोऽप्यवकरः।

यच्च प्रयोगः परमाणवो निरवयवाः परिमाणतारतम्यविश्रामास्पदत्वादात्मवदिति। तत्र व्यधिकरणासिद्धो हेतुः परमाणूनामप्रामाणिकत्वात्। तार्किकप्रक्रिययाऽऽश्रयासिद्धिश्च। अत एवास्माकीनं सांशत्वाद्यनुमानं न धर्मिग्राहकप्रमाणबाधितम्। अस्माकञ्च प्रतिबिम्बवत् प्रतीतिमात्रेणाश्रयत्वान्नाश्रयासिद्धिः। न चैवमाश्रयासिद्धिविलोपो विधिव्यवहारानर्हत्वान्निरुपाख्यस्य। तथा चैतानि भाषणानि निर्भयमुज्जृम्भन्ते,—परमाणवोऽनित्याः मूर्तत्वात्, गुणवत्त्वाद्दिग्भेदव्यवस्थापकत्वात् जडत्वाज्जातिमत्त्वात्पटवदिति।

यच्च महाविद्यानुमानं—परमाणुर्नित्यत्वव्यतिरिक्तैतन्निष्ठधर्मान्यधर्मवान् प्रमेयत्वात्पटवदिति। तत्प्रकरणसमत्वादुपेक्षणीयम्। परमाणुरनित्यत्वव्यतिरिक्तैतन्निष्ठधर्मान्यधर्मवान् प्रमेयत्वात्पटवदिति प्रयोक्तुं शक्यत्वात्, विपक्षबाधकानुकूलतर्काभावाच्च शङ्कितप्रयोजकत्वं, तस्मान्नित्यपरमाण्वसिद्धेः सूक्तमीश्वरमात्रस्य जगन्निमित्तोपादानत्वम्। तथा च श्रुतिः। सच्च त्यच्चाभवत् यदिदं किञ्च, तदात्मानं स्वयमकुरुतेति (तै. २.) ॥२३॥

।ब्रह्मणः परिणामित्ववादिमतखण्डनम्।

ये पुनर्भास्करीयाः श्रुतिप्रसिद्धं ब्रह्मणो निमित्तोपादानत्वमुररीकृत्यापि परमार्थतः परिणामित्वं श्रुतिस्मृतिन्यायविरुद्धमुररीचक्रुः ते तत्त्वदर्शनद्वेषप्रकर्षानलज्वलितकलेबरा वृथैव जगल्भिरे। यतो "मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरं" "इन्द्रो मायाभिः पुरुरूप ईयते"— इत्याद्याः श्रुतयो मायोपाधेर्ब्रह्मणः स्वोपाधिमायाविकारैर्जगदाश्रयत्वमेव जगत्प्रकृतित्वं श्रावयामासुः। स्मृतयोऽपि "मयाध्यक्षेण प्रकृतिः सूयते सचराचरं" "प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायये" त्याद्याः। न चैवं ब्रह्मणो जगत्प्रकृतित्वं गौणम्, जीवस्य स्वोपाधिव्यापारैर्धर्माधर्माश्रयत्ववन्मुख्यत्वसंभवात्। अन्यस्य मुख्यस्यासंभवाच्च। न च सृष्टिश्रुतिप्रामाण्यात्सत्यमेव परिणामित्वम्, तत्रापि सत्यशब्दाश्रवणात्प्रमाणस्य स्वप्रमेयासत्वमात्रासहिष्णुत्वात् सत्यत्वमिथ्यात्वयोरौदासीन्यात् स्वप्नसृष्टिवाक्यवच्च प्रामाण्योपपत्तिः। देवदत्तो व्याघ्रोऽभवदितिवत् सच्च त्यच्चाभवदिति, माया ह्येषा मया सृष्टेतिवत् तत्तेजोऽसृजतेति श्रुतिः। किञ्च—

"निष्कलं निष्क्रियं शान्तं" "एतदप्रमयं ध्रुवम्।"
"नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥"
"सर्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुवं।"
"अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः॥"

वर्जितः शक्यते वक्तुं यः सदास्तीति केवलम्" । इत्यादिश्रुतिस्मृतिविरोध मिथ्यासृष्टिविषयत्वमेव सृष्टिश्रुतीनां न्याय्यम् ।

। अत्र ब्रह्मप्रकाशिकाभिप्रायखण्डनम् ।

यदत्र **ब्रह्मप्रकाशिकाकारो** ववल्गे । विरोध एव नास्ति विकारोत्पत्तेः पूर्वं कारणस्याविकारत्वात्तदभिप्रायेण तासामुपपत्तेरिति, तदपि धार्ष्ट्यमात्रप्रकटनमविशेष-प्रवृत्तायाः श्रुतेः पीडाप्रसंगात् । न च सृष्टिश्रुत्यनुसारेण पीडैव न्याय्येति वाच्यम्. शुक्तेः स्वतोऽरूप्यत्वेऽपि मिथ्यारूप्यतादात्म्यवन्निर्विकारस्यापि सदा मायोपाधिक-विकारविषयत्वात्सृष्टिश्रुतेः । यच्चापरं कर्णकठोरं रुरोद–विरोधेऽप्यल्पत्वनिष्कलत्व-सामान्यविषयत्वैर्यथासंभवं निष्क्रियत्वादिश्रुतीनामेव भङ्गः । स्मृतयस्तु कापिलस्मृति-वत्तद्विरोधे नादर्तव्या इति । तत्र न तावदल्पत्वं भङ्गकारणम्, कर्मकाण्डेऽपि विधेरर्थवादा-दिभ्योऽल्पत्वेन भङ्गप्रसङ्गात् । नापि निष्फलत्वम्, " यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽ-निरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवती"ति निर्विशेषब्रह्मनिश्चयवत एवाभयप्राप्तिश्रवणात् ।" 'उदरमन्तरं कुरुते अथ तस्य भयं भवती"त्यल्पमपि भेदं कुर्वतो भयाभिधानात् । क्वचिद्विदुषोऽप्यैश्वर्यश्रवणस्य सगुणोपासनफलस्य स्तुत्यर्थतया संकीर्त्त-नात् । परमनिर्वाणं निर्विशेषब्रह्मात्मैकत्वज्ञानस्यैव फलमिति फलवत्तयाऽविकार्याद्वितीय-ब्रह्मप्रतिपत्तेः प्राधान्यान्न तद्विरुद्धविकारपरत्वं सृष्टिश्रुतीनामाश्रयणीयम् । किञ्च प्रमाणानुग्राहकस्तर्क इति न्यायविदो वावदन्ति । तदनुग्राहकत्वञ्च बलवत्त्वापादनमेव । अतो विकारित्वे सावयवत्वानित्यत्वादिप्रसङ्गलक्षणतर्कानुगृहीताविकारित्वश्रुतेरेव बाधकत्वम् ।

। भास्करमतेन परिणामित्वनिर्वचनं तत्खण्डनं च ।

यच्च **भास्करेणा**भाणि–शक्तिविक्षेपकत्वं परिणामित्वमिति, तत्र सैव शक्ति-रसत्या सत्या वा ? आद्ये मायामतापातः । इष्यते हि चित्तंत्रतयाऽपि शक्तिरेव "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढा" मित्यादिश्रुतेः ।

। मायापदार्थविचारः ।

यच्चाभिदधे–मायाशब्देन प्रज्ञा अभिधीयते प्रज्ञानामसु पाठादिति, तत्र किं प्रज्ञा ब्रह्मचैतन्यमुच्यते ? किं वा भ्रान्तिज्ञानं ? नाद्यो, भूयश्चान्ते विश्वमायानिवृत्ति-रिति तत्त्वज्ञाननिवर्त्यत्वश्रवणाल्लोके च मायाविना प्रदर्श्यमानदृष्टनष्टस्वभावे करिनरतुरगादौ मायेयं मायेयमित्यनुगताकारप्रत्ययदर्शनात्, लाघवादनुगतमिथ्या-वस्तुन्येव व्युत्पत्तेः "माययाऽपहृतज्ञाना आसुरं भावमाश्रिता " इति च चैतन्यासंभवि-कार्यस्मरणाच्चैतन्यं मायेत्यचतुरश्रमेव । द्वितीये तु मायिनं तु महेश्वरमिति श्रवणात्

ब्रह्मणो भ्रान्तत्वप्रसङ्गः। प्रकृतित्वञ्च श्रयमाणं न क्षणिकानां भ्रान्तीनां घटां प्राञ्चति।

"प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि"

इति चानादित्वं प्रकृतेर्मायायाः स्मर्यमाणं विरुद्ध्येत। तस्मात् "नासदासीन्नो सदासीत्"तम आसीत् "अक्षरात्परतः परः," "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः।" इत्यादिश्रुतिस्मृतिप्रसिद्धा अनादिसिद्धा सदसत्वाभ्यामनिर्वाच्या जडात्मिका पारमेश्वरी मायाऽभ्युपगन्तव्या। यदि पुनः पारमार्थिकी ब्रह्मणः शक्तिराश्रयिष्यते ततो निरूपणसहिष्णुत्वं निरूपणीयम्; निरूपणं न सहते सत्या चेति विप्रतिषेधात्, निरूप्यमाणे च नात्यन्तभेदेऽभेदे वा शक्तितद्वद्भावौ, भिन्नाभिन्नत्वञ्च विरोधादेव नाङ्गं धारयति। चन्द्रभेदस्य तदेकत्वज्ञानेन देहाद्भेदज्ञानेन च तदभेदस्य बाधदर्शनाद्विरोधः स्थित एव।

किञ्चैकस्मिन् रूपे चेद्भेदाभेदबुद्धी पर्यायतापातः, रूपभेदे चेदनवस्था। किञ्च कृत्स्नस्य भिन्नत्वमभिन्नत्वञ्च किं वा अंशाभ्यां? प्रथमे किं युगपत्क्रमेण वा? नाद्यः कृत्स्नस्यैव भिन्नत्वे तथैव समाप्तत्वादभेदायोगात्। नापि द्वितीयः। स्थिते पूर्वरूपे विरोधान्नोत्तरं रूपम्; नष्टेऽपि तस्मिंस्तदभावान्नोत्तरं रूपम्। नाप्यंशाभ्यां निरंशत्वाद्ब्रह्मतच्छक्त्योः। तस्माद्यद्यतो भिन्नं तत्ततो नाभिन्नम्, यथा भेदरूपं अभेदात्। यच्चाभिन्नं यतस्तन्न भिन्नं तस्माद्यथा स्वरूपमिति लौकिकव्याप्तिविरोधान्न शक्तेर्भिन्नाभिन्नत्वं निरूपणपद्धतिमध्यास्ते। सम्बन्धोऽपि चास्या न प्रागुक्तरीत्यैव भागी। शक्यमपि चास्याः सत् असद्वा। न तावत् सदुत्पाद्यं सत्वाद्ब्रह्मवत्। अभिव्यक्तिरपि सती चेन्न साध्या असती चेदसद्वादप्रसङ्गः अभिव्यक्तेश्चाभिव्यक्त्यभ्युपगमेऽनवस्था—नाप्यसदुत्पाद्यं शक्त्या, असत्वान्नरविषाणवत् असत्वं न प्राक्विशेषणार्हमसत्वादेव।

किञ्च जनिःसकर्तृका क्रियात्वात् भ्रमिवत्, तत्र जायमानं चेदसदकर्तृकैव सा स्यात्। नच हेतुकर्तृका कुम्भकारादेः कारयितृत्वात्। जातत्वप्रसिद्ध्यभावाच्च। असतश्च न हेतुशक्त्या[1] सम्बन्धोऽपि, सदसतोः सम्बन्धानिरूपणादतिप्रसङ्गाच्च। तस्माच्छक्यानिरूपणान्न शक्तिर्निरूपणं सहत इति न शक्तिविक्षेपः परिणामः ॥१५॥

। परिणामस्वरूपविचारः ।

परिणामो मिथ्येति निर्णयश्च

पूर्वावस्थापरित्यागेनावस्थान्तरापत्तिः परिणाम इति केचित्, तदपि न निरूपणं क्षमते। तथा हि—किमवस्थावताऽवस्था त्यज्यते किं वा तद्रहितेन? नाद्यो विरोधात्, न द्वितीयः, अप्राप्तेः। किं च स्वाभाविकी सा त्यज्यते कादाचित्की वा? नाद्यः

(1) हेतुशक्ति—का.

स्वभावत्यागानुपपत्तेः, एकस्य त्यक्तृत्वत्याज्यत्वासंभवात्। द्वितीयेऽपि सा न सती त्याज्या, अन्यत्र सत्वानुपपत्तेः, असत्यास्तु कस्त्यागः सदसत्वं तु विरोधादेव निरस्तम्। या चोत्तरावस्था प्राप्यते, सापि न सती प्राप्यते, तत्संबन्धं विना सत्त्वानुपपत्तेः असत्यास्तु का प्राप्तिः? ननु मृदादीनां पूर्वावस्थापरित्यागेनोत्तरावस्था दृश्यते। सत्यं नैतावता सत्यता सिध्यति, दर्शनस्य सत्यासत्यसाधारण्यात्, अन्यथा नभसो मलिनताया अपि सत्यतापातात्। तस्मात्पूर्वावस्थापरित्यागोत्तरावस्थाप्राप्त्योर्निरूपणासहत्वान्न सत्यः परिणामः।

अत एवेदं दुष्टं ब्रह्म तत्वतः परिणामि, उपादानत्वान्मृद्वदिति साध्यवैकल्यात्। परिणाममात्रसाधने सिद्धसाधनम्। किञ्च सत्यज्ञानानंदाद्वितीयलक्षणपूर्वावस्थापरित्यागेन चेत्कार्यापत्तिः, तर्हीदानीं कार्यमात्रं वस्तु स्यात्, निरंशस्यावशेषायोगात्, तदा च सत्यज्ञानानंदाद्वितीयं ब्रह्मास्मीति ज्ञानासंभवात् मोक्षो दुर्घटः-स्यात्। अथैतद्दोषपरिजिहीर्षया पूर्वस्वरूपापरित्यागेन कल्पितसांशत्वाङ्गीकारेण कार्यापत्तिमभिदधीत भवान्, तदा विवर्तमेव प्रतिपादयेद्यतोऽप्रच्युतप्राच्यावस्थस्यासत्यनानाकारावभासो विवर्त इति तद्विदः। किञ्च वस्तुनोऽन्यथाभावः किं तथाभूतस्यान्यथाभूतस्य वा, अन्यथा बुभूषोर्वा? नाद्यो निरवद्यः, पूर्वस्वरूपविरोधात्, सदाऽन्यथाभावप्रसङ्गाच्च न कदापि रूप्याभावः स्यात्, द्वितीये त्वनवस्था सुस्थितैव। तृतीये त्वन्यथाबुभूषापि निर्विशेषस्य चेत्सदा स्यात्। न चेत्, न जातु स्यात्, विशेषाभावादेव, सविशेषस्य चेदन्यथाबुभूषा,ऽनवस्थातादवस्थ्यम्। किञ्च स्वत एव वस्तुनोऽन्यथाभावो, हेतुसम्बन्धाद्वा। अग्रे सदा प्रसङ्गः। अन्त्ये हेतोरपि हेतुत्वं स्वत एव हेत्वन्तरद्वा? आद्ये सदा प्रसङ्गः, द्वितीये त्वनवस्था। तस्मादनिर्वाच्यप्रपञ्चां मायां विहाय वस्तुनोऽन्यथाभावासंभवान्महामायामहिम्नैव जगदुपादानमद्वितीयं ब्रह्मेति सिद्धम्।

वेदो वक्त्यविकारतां स्मृतिरपि प्रत्यक्षमाक्रोशति
प्रत्युक्ता विकृतिर्मृदादिषु सती तत्वे तु नो सात्र किम्[1]।
सांशं मूढमनित्यमापतति ते ब्रह्माप्यदोषं परं
तस्मात्कष्टमहो विमूढमनसां वैकारिवाग्वल्गनम्॥ २६॥

। अद्वैते प्रमाणनिरूपणम् ।

इह ह्यद्वितीयं ब्रह्म स्वमायया जगदुपादानमित्युपश्रुत्य स्वसिद्धान्तश्रद्धालवः सव द्वैतवादिनो महता संभ्रमेण परिचोदयन्ति—किमद्वैते प्रमाणमस्ति न वा? अस्ति चेत्तर्ह्यद्वैतव्याघातः, प्रमेयातिरिक्तस्यैव प्रमाणस्य प्रसिद्धत्वात्। नास्ति चेत्तर्हि नाद्वैतसिद्धिः, प्रमाणाधीनत्वात्प्रमेयसिद्धेरिति। तदेतदद्वैतपदार्थानभिज्ञानां गलगर्जनमात्रम्। तथाहि—तात्त्विकद्वैतविधुरं सद्वस्त्वद्वैतपदार्थस्तत्रैकमेवाद्वितीयमित्यादिशास्त्रं प्रमाणम्।

(1) तत्त्वे तु तस्यात्र किम. पु.

। मिथ्याभूतस्यार्थक्रियाकारित्वोपपत्तिः ।

तस्य च स्वरूपेण तात्त्विकत्वाभावात् कुतोऽद्वैतव्याघातोऽवतरीतर्त्ति ? न चातात्त्विकत्वेऽसाधकत्वम्, स्वप्नकामिनीसंभोगादेरिवार्थक्रियाक्षमत्वात्। न च स्वप्नकामिन्यादिदर्शनस्य सत्यस्यैव तत्रार्थक्रियाक्षमत्वमिति वाच्यम्। दर्शनमात्रस्यार्थक्रियाविशेषहेतुत्वानुपपत्तेरन्यथाऽतिप्रसङ्गात्। मिथ्यार्थविशिष्टस्यार्थस्यार्थक्रियाकारित्वे तस्यार्थक्रियाकारित्वं त्वयैवोररीकृतं स्यात्, अथ मिथ्यार्थोपलक्षितं दर्शनमर्थक्रियाक्षममिति मन्वीथाः तन्मा वृथा मंस्थाः, उपलक्षकत्वेनाप्यर्थक्रियाक्षमत्वस्य दुर्निवारत्वात्। किञ्च मिथ्याभूतमर्थक्रियाक्षमं न भवतीति वदन्नेवार्थक्रियाक्षमत्वमङ्गीकुरुते, प्रतिषेधप्रवर्तकत्वाभ्युपगमात्। न चैवं धूमाभासस्यापि धूमध्वजबोधकत्वप्रसङ्गः। आभासविवेकस्य बहुलोर्ध्वतादिवद्व्याप्त्युपयोगितया तस्याव्याप्यत्वात्। व्याप्यस्य त्वसत्यस्यापि जलान्तर्वर्त्तिप्रदीपप्रतिबिम्बस्य गृहान्तर्वर्तिप्रदीपानुमापकत्वात्; सत्यत्वकिञ्चत्कारेणैवानुमापकत्वे कनकस्यापि वज्रानुमापकत्वप्रसङ्गात्। तस्मादन्वयव्यतिरेकाभ्यां तत्र तत्र मिथ्याभूतस्याप्यर्थक्रियाकारित्वदर्शनात् तात्त्विकसत्यत्ववैधुर्येऽपि श्रुतेरर्थेऽद्वैते साधकत्वमविरुद्धम्।

किञ्चाद्वैतप्रमाणेन स्वप्रमेयं न हन्यते।
हन्तृत्वे तन्न तन्मानं मानं हन्तृ न कस्यचित् ॥२७॥

। अद्वैतस्य प्रमाणप्रश्नात् प्रागेव सिद्धत्वोपपत्तिः ।

अपि च नाद्वैते प्रमाणप्रश्नं प्रशंसन्तितराम्। यो हि बहु कल्पयति कल्पयत्यसावेकमिति न्यायेन सद्भेदवादिनोऽप्येकं तावत्सिद्धम्। निरूपणाच्च प्राग् प्रतीतिगोचरस्याभेदस्य सत्यता सिद्धा। अतो विचारात्प्रागेव तात्त्विकभेदविधुरस्यैकस्य सतोऽद्वितीयशब्दार्थस्य सिद्धत्वान्नाद्वैतं प्रमाणप्रश्नार्हम्। किन्तु द्वैतसत्यत्ववादिनैव तत्सत्यत्वे प्रमाणं वाच्यम्। निरूपणाच्चोत्तरकालं द्वैतं सैकतकूपवत् सरीसृस्यत एव। कुतस्तराँ तदाप्यद्वैतप्रमाणपर्यनुयोगो भागी ? तथा हि—सद्भिद्यमानं किं सदाकारेण भिद्यते किंस्विदसदाकारेण ? आद्ये यद्भिद्यते तदेवैकं सत् व्यावर्तकासाधारणाकारमन्तरेण व्यावृत्योगात्। अपरथा स्वरूपादपि व्यावृत्तिप्रसङ्गात्। द्वितीये तु यतो व्यावर्तते तदेवैकं सदिति नास्ति सदन्तरम्।

। ब्रह्मान्यसत्तासामान्यनिराकरणम् ।

यदपि कल्पयन्ति—सत्ता नाम महासामान्यम्, तद्व्यक्तयस्तु घटादय इति, तदपि परस्पराश्रयपराहतम्। सिद्धे व्यक्तिभेदे तत्रानुगतत्वेन सामान्यसिद्धिः। तत्सिद्धौ च तद्व्यंजकत्वेन व्यक्तिभेदसिद्धिरिति। किञ्च, नानुगतसत्तां विहाय घटादीनां पृथक् स्वरूपसत्वे प्रमाणमस्ति। न तावत्सन् घटः सन् पट इत्यादिप्रत्ययः प्रमाणम्, तस्यानुगतसत्वविषयत्वात्। नाप्यनुगत्यनुपपत्तिः, अपरोक्षत्वानुपपत्तिर्वा मानम्,

शुक्तीदमंशसंसृष्टरूप्यसत्वाभावेऽपि सदिदं रूप्यमिति तत्र सत्वानुगत्यपरोक्षत्वयोर्दर्शनात्, तद्वदिहापि तुच्छव्यावृत्तिमात्रेण सत्त्वानुगत्यपरोक्षतयोरुपपत्तेः। न च तुच्छव्यावृत्तिमात्रं स्वरूपसत्वम्, व्यावृत्तेः सप्रतियोगिकत्वात्, स्वरूपस्य च निष्प्रतियोगिकत्वेन प्रसिद्धेः। व्यावृत्तेश्च व्यावृत्त्यन्तराभावात् स्वरूपाणां परस्परव्यावृत्तिर्न स्यात्। अतो नास्ति सद्भेदे मानमित्यद्वैतं सिद्धम्।

। अद्वैतस्य प्रत्यक्षादिभिः अबाध्यत्वोपपत्तिः।

नन्वद्वैतं ब्रह्मविद एव व्यतिविद्रते; वयन्तु प्रत्यक्षादिभिः प्रमाणैर्द्वैतमेवोपलभामहे। न च तत्र कारणदोषं बाधं वा प्रतिपद्येमहि। सत्त्वञ्च घटादीनां प्रामाणिकमेवेति चेन्नैतत्सारम्। यद्यापाततो बाधकारणदोषानुपलम्भेन सत्यत्वम्, तदा चन्द्रप्रादेशत्वादेरपि सत्यत्वापातः। सर्वथा तु बाधकारणदोषाभावो नासर्वज्ञस्य शक्यज्ञानः; सत्वं च प्रामाणिकत्वञ्चेन्न प्रत्यक्षं स्यात्, प्रमाणसम्बन्धस्य तद्योग्यत्वस्य वा प्रत्यक्षायोग्यत्वात्। किञ्च न सकलव्यावृत्तं घटादिस्वरूपं प्रत्यक्षेण गृहीतुं शक्यम्, सर्वज्ञतापातात्। नापि कतिपयव्यावृत्तं परस्पराश्रयग्रस्तत्वात्। धर्मिणो हि व्यावृत्तिसिद्धौ प्रतियोगित्वसिद्धिस्तत्सिद्धौ च ततो व्यावृत्तिसिद्धिः। न च व्यावृत्तिसत्तामात्रेण प्रतियोगित्वम्, दूरस्थतरुगिर्यादेरदर्शनात्। किञ्च दण्डयादौ विशेषणविशेष्यभावस्य भेदग्रहणपुरःसरत्वदर्शनाद्भिन्नो घट इति विशेषणविशेष्यभावोपपत्तये प्रागेव भेदान्तरं ग्राह्यम्। तदपि स्वातन्त्र्यानुपलम्भाद्विशेषणविशेष्यभावेनैव ग्राह्यमिति तत्सिद्ध्यर्थमपि भेदान्तरं प्रागेव ग्राह्यम्[1]। ततः पूर्वपूर्वासिद्धावुत्तरोत्तरासिद्धेर्मौलिकव्यवहारासिद्धेर्मूलक्षतिः। किञ्च भेदो वस्तुनो भिन्नश्चेन्न तद्धर्मः, सम्बन्धानिरूपणात्। अभिन्नत्वे वस्त्वेव भेदो नाम स्यात्। भिन्नाभिन्नत्वे चानवस्था। तस्मादविचारसुन्दरव्यवहारगोचर एवाभेदोऽध्यक्षादिगोचर इति स्थितम्।

किञ्चेदं द्वैतस्फुरणं स्वतः परतो वा? नाद्यः, जाड्यहानिप्रसङ्गात्। नापि परतः तत्किमसम्बद्धमेव स्फोरकं सम्बद्धं वा? आद्ये सदा स्फुरणप्रसंगः। संबद्धं चेत्तर्हि स सम्बन्धः, किं सम्बन्धिभ्यामन्यो वाऽनन्यो वा अन्यानन्यो वा, अन्यत्वेऽपि संबद्धोऽसंबद्धो वा, आद्येऽनवस्था, अन्त्ये तदीयता न स्यात्। स्वपरनिर्वाहकत्वञ्च प्रागेव निरटङ्कि। अनन्यत्वे तु वस्तुनी एव। अन्यानन्यत्वञ्च विरोधादेव निरासि।

किञ्च ध्वस्तानागतयोः सम्बन्धः स्फोरकेण साकं कथङ्कारं निरूप्येत? आश्रयतन्त्रस्य तदभावेऽभावात्। ननु दृष्टयाद्यप्यतीताद्याकारेण वर्तत एव। इतरथाऽतीतत्वस्याप्यतीतत्वप्रसंगात्। न, अतीतत्वं ह्यतीतकालावच्छिन्नत्वं, न चावच्छेदकमन्तरेणावच्छिन्नस्य संभवः, तस्य च भावेऽतीतादित्वव्याघातः स्यात्। तस्मादिदानीं ध्वस्तादेरभावात् न स्फोरकसम्बन्धाधारत्वम्।

(1) ज्ञेयम्–पु.

। विषयविषयिणोः सम्बन्धानुपपत्तिः ।

ननु वर्तमाने तावत्सम्बन्धाधारत्वं न विरुध्यते। अहो सम्बन्धबोधविधानेऽतिव्याकुलेनात्यल्पमिदमुच्यते। न हि वर्तमाननिरूपणाय प्रक्रान्तम्, किन्तु द्वैतं, ध्वस्ताद्यपि च द्वैतमेव। किञ्च वर्तमानेऽपि विषयविषयिभावो नामैकः सम्बन्धो नोभयाधारः संबोबुध्यते। विषये विषयिभावस्य विषयिणि च विषयभावस्य वृत्त्यसंभवात्। अथैको विषयोऽन्यो विषयीत्ययमेव विषयविषयिभावः, तथाऽपि तयोः परस्पराधीनसिद्धिकत्वान्नैकस्यापि सम्बन्धः संगच्छते। किञ्च, स्फोरकसम्बन्धाज्जायमानं स्फुरणं प्रमेयाश्रयं जायते, प्रमात्राश्रयं वा ? प्रथमे न तेन द्वैते व्यवहारावतारो रेखयेव। जडविकारत्वाच्च स्फुरणत्वमपि स्याद्रेखावदेव। प्रमात्राश्रयत्वे च घटःप्रकाशत इति व्यवहारो न स्यात्। अथ तदाकारत्वात् तद्व्यवहारः। न, आकारानिरूपणात्। न तावद्विषय एवाकारः स्फुरणस्य। प्रकाशाप्रकाशयोर्विरुद्धरूपत्वात्। नापि विषयवदाकारो मूर्तत्वाद्यनिष्टधर्मप्रसंगात्। नापि विषयव्यापकत्वम्, प्रदीपवदसंसर्गात्। नापि विषयस्य तस्मिन्प्रतिबिम्बितत्वम्, मूर्तस्यामूर्ते प्रतिबिम्बभावादर्शनाद्देहादिव्यवधानाच्च। नापि विषयकर्मकता, स्फुरणस्य प्रकाशमात्ररूपस्याक्रियात्वेन कर्मकारकनैराकाङ्क्ष्याद्नुमानादौ च व्यभिचारात्। इतरथा तत्राप्यापरोक्ष्यप्रसंगः। तद्व्यावृत्तत्वं चेच्चक्षुरादेरपि स्फुरणप्रसंगः, विषयस्य वा अद्याप्यसिद्धेः। तस्मात्फुरणसंसर्गानिरूपणात् द्वैतस्फुरणव्यवहारोऽविचारितरमणीय एव।

इत्थं निरूप्यमाणोऽयं भेदः सत्यो न दृश्यते।
स्वतः सिद्धमतोऽद्वैतं न प्रमाप्रश्नमर्हति ॥२८॥

। द्वैतसत्यत्वस्थापकाः के इति प्रश्नः ।

अपि च निरन्तरमद्वैतब्रह्मविद्यानिरतानां श्रुत्यनुगृहीतदृढतरतर्कोपबृंहितानां वेदान्तिनां पुरतः केनेदं द्वैतं तत्वतः प्रतिष्ठापयिष्यते ? किं काणादेन, किमक्षपादपादोपजीविना, कापिलेन वा, आहोस्वित् सौगतेन, यद्वा दिगम्बरेण, उत लोकायतिकेन, किं वा कर्ममीमांसकेन, किस्वित् स्वशिष्येण केन चित् ? यदि तावद् काणादेन, स इत्थं प्रत्यतिष्ठिपत् द्रव्यादयः षट्पदार्था इति।

। काणादमतेन पदार्थनिरूपणम् ।

तथाहि-गुणाश्रयो द्रव्यं पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव द्रव्याणि। निर्गुणाः सामान्यवदक्रियात्मका गुणाः। रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारगुरुत्वद्रवत्वस्नेहशब्दाश्चतुर्विंशतिर्गुणाः। संयोगविभागयोरनपेक्षकारणं कर्म, उत्क्षेपणापक्षेपणगमनाकुञ्चनप्रसारणानि पञ्च कर्माणि। व्यक्तिभेदेऽनुवृत्तप्रत्ययालम्बनं सामान्यम्। तत्र परं सत्तासामान्यम्, बहुव्यापकत्वात्, अपरं द्रव्यत्वादि अल्पव्याकत्वात्। व्यावृत्तबुद्धि-

हेतवो विशेषाः। सामान्यविशेषा गोत्वादयो नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः। अयुतसिद्धयोराश्रयाश्रयिभाव इहप्रत्ययहेतुः समवायः। स च एकः सर्वगतो नित्यश्चेति।

। काणादमतनिराकरणम् ।

तत्रोच्यते। षट्पदार्था इति समासपदमसमासपदं वा? आद्ये न संख्यालाभः सप्तग्राम इतिवत्। "दिक्संख्ये संज्ञायाम्" इति **पाणिनिस्मरणात्**। असमासाभिधाने नान्यान्तर्भावः, षडेते गाव इत्युक्ते न हि सकलगवां तत्रान्तर्भावः संबोभवीतीति। अथ षडेव वस्तूनि भावरूपाणि, सप्तमस्त्वभावः, नान्यत्किञ्चिदस्तीत्यभिप्रायः। तर्हि कुतोऽन्याभावोऽज्ञायि भवता। न तावदनुपलम्भमात्रात्, अतिप्रसंगात्। न च योग्यानुपलब्ध्या, लोकान्तरादिवर्तिनां भावानां भवतोऽयोग्यत्वात्। न च सर्वज्ञसूत्रकारवचनादज्ञायीति वाच्यम्। तेषां विवाददर्शनात्। न चैकः सर्वज्ञो नेतर इति प्रमाणमस्ति। अन्तर्भावकल्पनायाञ्च सत्येवैकस्मिन् सा लघीयसी। किञ्च यदेतद्द्रव्यादिलक्षणं तन्न तावल्लक्ष्यस्वरूपावगतये, परस्पराश्रयापातात्, लक्ष्ये दृष्टे तन्निष्ठं लक्षणं द्रष्टव्यम्, लक्षणदृष्टेश्च तद्दृष्टिरिति। नापि द्रव्यलक्षणमद्रव्यव्यावृत्तये, सिद्धे द्रव्यलक्षणे तत्प्रतियोगिकाद्रव्यसिद्धिः, तत्सिद्धौ च तद्व्यावृत्तये द्रव्यलक्षणमितीतरेतराश्रयात्, कः खलु त्वत्कुतर्कानुपहतबुद्धिर्लौकिको नीलपीतादिवत् द्रव्यादिस्वरूपं प्रत्येति? इतरथा नीलपीतादिस्वरूपवत् द्रव्यादिस्वरूपेऽपि सुगतादीनां विसंवादो न स्यात्। क्वचित्तु क्रियादिवाची द्रव्यशब्दो योगिकः, गुणशब्दः शोभनवाची। पुराणादौ स्वभाववाची, घटस्य शौक्ल्यमिति तु घटस्य स्वरूपमितिवद्भविष्यति। तस्माल्लोकसिद्धस्यैव द्रव्यादेर्लक्षणेन विभागमात्रं क्रियत इति स्वमनोरथमात्रम्।

। उदयनोक्तसमाधानप्रतिक्षेपः ।

यदप्युदयनादिना जगदे—लक्षणं केवलव्यतिरेक्यनुमानम्। तथाहि-गुणवद्द्रव्यं द्रव्यमिति व्यवहर्त्तव्यम्, गुणाश्रयत्वान्न यदेवं न तदेवम्, यथा वस्त्वन्तरं तदपि दुराशामात्रं, हेतोरसिद्धत्वात्। सिद्धे द्रव्यगुणविभागे गुणाश्रयत्वसिद्धिः, तत्सिद्धौ च गुणाश्रयत्वेन गुणातिरिक्तद्रव्यसिद्धिरिति परस्पराश्रयात्। किञ्च, द्रव्याभावप्रमितेः द्रव्यप्रमितिसापेक्षत्वात्तदसिद्धौ च व्यतिरेकानवधारणात् संदिग्धानैकान्तिकत्वम्, पक्षस्याप्रसिद्धविशेषणत्वं च सुप्रसिद्धम्। न च केवलव्यतिरेकिणि नाप्रसिद्धविशेषणत्वं दूषणम्, केवलव्यतिरेकित्वव्याघातादिति वाच्यम्, अनिष्टापादनस्येष्टापादननिरूप्यत्वात्। घटोऽयं नरविषाणविदीर्णः, घटत्वात्, न य एवं न स एवं यथा पट इत्यस्यापि सदनुमानतापाताच्च। तत्रानुकूलतर्काभावादप्रयोजकत्वं चेत्समः समाधिः, अन्यत्राभिनिवेशात्। तस्माद्द्रव्यादिसद्भावं माचीक्लृपः, व्यतिरेकिबकात्। शक्तिश्चासाधीति न षट्पदार्थावधारणं घटां पर्यटति। किञ्च, पञ्चैते गाव इत्यादौ संख्यानिवेशो गोत्वा-

द्याश्रयणेन दृश्यते, द्रव्यादिषु तु किमेकं साधारणं यदाश्रित्य षट्संख्या निविशते। न तावद्भावत्वमेकं षट्स्वनुगतं तेऽस्ति, सामान्यादिषु भावत्वानुगमानङ्गीकरणात् **काणादैः** नापि प्रमेयत्वं पदार्थत्वं वा, सप्तमपदार्थाभ्युपगमप्रसंगात्, अभावस्यापि कदाचिद्विधिप्रत्ययप्रमेयत्वात्, पदार्थत्वाच्च। तस्मान्न मानमूलेयं षट्पदार्थप्रकल्पना, किन्तु राद्धान्तनिर्बन्धध्वान्तान्धधिषणोद्भवा ॥२९॥

। द्रव्यनिराकरणम् ।

यदप्यवादि नवैव द्रव्याणीति, तदपि दुर्निरूपम्। तत्र परमाण्वपाकरणेनैव भूतचतुष्टयं चतुर्विधपरमाण्वारब्धमित्यपाकृतमेव। अवयविद्रव्यञ्च प्रमाणाभावादेवापास्तम्। न तावत् स्वातन्त्र्योपलम्भोऽवयविनि प्रमाणम्, वनोपलम्भवदुपपत्तेः। नाप्येकाकर्षणे सर्वाकर्षणम्, काष्ठभारवदुपपत्तेः। नाप्येकैकस्मिन्नसंभाव्यमानविशिष्टार्थक्रियादर्शनम्, एकैकेनाशक्यचालनस्यापि पाषाणादेर्मिलितैश्चालनोपलम्भात्। अवयविनश्चावयवेषु समवायलक्षणा वृत्तिरिति समवायनिरासेनैव निरासि। तस्मादविचारितरमणीयावयवसङ्घतातिरिक्तावयविनो निष्प्रमाणिकत्वान्न महाभूतचतुष्टयमवयविद्रव्यमिति स्थितम् ॥६०॥

। शरीरस्य पाञ्चभौतिकत्वनिरूपणम् ।

यच्च भौतिकमस्मदादिशरीरं पार्थिवमेवेति, तदप्यसत्, औष्ण्यादेर्भूतान्तरगुणस्यापि शरीरे दर्शनात्। ननूदकेऽग्निसंयोगादौष्ण्यवद्भूतान्तरसंयोगादपि तद्गुणोपलम्भसंभवान्न भूतान्तरोत्थत्वसिद्धिः, नैतदवदातम्। यथैकैकतन्त्वपचये स्वरूपेणापचीयमानः पटः सर्वतन्त्वारब्धोऽङ्गीक्रियते, तथैकैकभूतभागवियोगे स्वरूपेणापचीयमानस्य शरीरस्य सर्वभूतारब्धत्वोपपत्तेः। यच्चेन्द्रियाणामेकैकभूतारब्धत्वम् तत्तद्गुणव्यञ्जकत्वेन, तदपि श्रोत्रे व्यभिचरति। अतिप्रसङ्गि च मनआदौ, तस्मात्तेजोमयी वागित्यादिभौतिकत्वोपलक्षणार्थश्रुतेरनुभववेद्यानां भौतिकत्वं ग्राह्यम्।

किञ्च मायोपाधिरीश्वरः सर्गादौ भूतानि निर्माय तानि द्विधा विभज्य पुनश्चैकैकं भागं चतुर्धा विभज्येतरेषु निक्षिप्य पञ्चीकृतान्यकरोत्, इत्येतत् तासां त्रिवृतं त्रिवृतमेकैकामकरोत् इति पञ्चीकरणोपलक्षणार्थत्रिवृत्करणश्रुतेरवसीयते। प्राणिनां कल्पान्तरोपार्जितकर्मफलोपभोगार्था च सृष्टिः। फलोपभोगश्च न सूक्ष्मेभ्यो भूतेभ्यो भागी। तस्मात्सर्वस्य पञ्चीकृतत्वावगमादपि नैकैकभूतारब्धत्वं शरीराणाम्, सर्वस्य पञ्चीकृतत्वेऽपि भूयस्त्वापेक्षया तत्तद्व्यवहारः।

। शरीरपाञ्चभौतिकत्वे दूषणोद्भावनम् तत्समाधिश्च ।

यदप्यगादि **कणादेन**—प्रत्यक्षाप्रत्यक्षवृत्तेरप्रत्यक्षत्वाद्वायुवनस्पतिसंयोगवच्छरीरमप्रत्यक्षं स्यात्, तदपि न साधु। प्रत्यक्षाप्रत्यक्षसंयोगत्वस्यैव तत्र प्रयोजकत्वात्।

अन्यथा प्रत्यक्षाप्रत्यक्षारब्धत्वं चेत् प्रयोजकं घटोऽप्यप्रत्यक्षःस्यात्। अथ चाक्षुषत्वयोग्यायोग्यारब्धोऽचाक्षुषः, तर्हि त्र्यणुकपरमाण्वारब्धे कार्ये चाक्षुषत्वं न स्यात्। न च तथाविधं कार्यमेव नास्ति, समानजातीयानामेवारम्भकत्वदर्शनादिति वाच्यम्। विजातीयानामपि करशिरश्चरणादीनां देहारम्भकत्वदर्शनात्। तन्तूनामूर्णानाञ्च विचित्रकम्बलारम्भकत्वदर्शनात्। तत्र द्रव्यत्वादिजातीयत्वेन सजातीयत्वे प्रकृतेऽपि समः समाधिः।

। परमाणुकारणतावादप्रतिक्षेपः ।

द्व्यणुकक्रमेणैव कार्यारम्भ इत्ययमपि मन्त्रपाठः। प्रध्वस्ते घटे त्र्यणुकपर्यन्तं कार्योपलब्धिस्त्र्यणुकप्रक्रमेणैवोत्तरकार्यारम्भोऽस्तु, स च त्रिभिः परमाणुभिरारभ्यताम्! किं द्व्यणुकैः। ननु त्र्यणुकं न साक्षाद्बहुपरमाण्वारब्धं कार्यत्वात् पटवत्। न, विपक्षबाधकाभावेनाप्रयोजकत्वात्। न चान्त्यकार्यपर्यन्तं परमाणूनामेवारम्भकत्वप्रसंगः। द्व्यणुकेष्वपि समानत्वात्। किञ्चात्यल्पमिदमुच्यते न बहूनां परमाणूनामारम्भकत्वं सम्भवतीति। यतो न द्वयोरप्यारम्भकत्वं निरूपणं सहते। तथा हि, संयोगसचिवयोर्द्वयोः परमाण्वोर्द्व्यणुकारम्भकत्वं न्यरूरूपन्, क्रियाजन्यश्च तयोः संयोगः, प्रलये च निश्चलयोः परमाण्वोः क्रियोत्पत्तौ किं निमित्तम्? न तावददृष्टम्, तस्याचेतनस्य स्वातन्त्र्येण प्रवर्तकत्वासंभवात्। नचेश्वराधिष्ठितस्यादृष्टस्य प्रवर्तकत्वम्, अदृष्टस्यात्मगुणस्येश्वरेण संयोगादिसम्बन्धाभावात्, असम्बद्धस्य चाधिष्ठेयत्वे दृष्टन्ताभावात्। नापीश्वरेच्छैव परमाणुप्रवृत्तिकारणम्, तस्याः साक्षात्परमाणुसम्बन्धवैधुर्यात्। स्वाश्रयसंयोगनिबन्धनेन सम्बन्धेन प्रवर्तकत्वे गर्दभेच्छयापि प्रसंगः। तस्मात्परमाणवः सर्गादौ कर्मशून्याः, तन्निमित्तविधुरत्वादाकाशवत्, ततः संयोगशून्या इत्यनारम्भकाः।

पीलुपाकवादखण्डनम् ।

यच्च पाकात् परमाणुपर्यन्तं नष्टे घटे लोहितेभ्यः परमाणुभ्यःपुनरीश्वरेच्छया आरम्भ इति, तत्र कुम्भकारस्याविक्रेयत्वप्रसंगः, प्रत्यक्षबाधश्च, पित्रादिव्यवहारभंगप्रसंगश्च ॥३१॥

आरम्भासंभवादेवमवयव्यनिरूपणात्।
भूभूधराद्यनिर्वाच्यं **काणादस्य** सुनिश्चितम् ॥३२॥

। आकाशनित्यतानिराकरणम् ।

यदप्याकाशनित्यतानिरूपणं[1] स आकाशो नित्यः, निरवयवद्रव्यत्वादात्मवदिति, तदप्यचारु, श्रुतिविरोधात्। तथाहि--"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी," इत्याद्याः पृथिव्यादिवदा-

(1) चक्रवासः --का.

काशस्याप्युत्पत्तिं ब्रुवाणा अनित्यत्वं ख्यापयन्ति। नन्वनुमानस्याप्रामाण्ये सिद्धे श्रुतेः-स्वार्थे प्रामाण्यं सिद्ध्यति, ततश्चानुमानस्याप्रामाण्यमिति परस्पराश्रयम्। न, श्रुतेः-स्वतः प्रामाण्यात्। नो खल्वनुमानाप्रामाण्याधीनं श्रुतेः प्रामाण्यम् किन्तु शक्तितात्पर्याभ्यामित्यवोचाम[1]। अनुमानस्य त्वाधितविषयत्वमङ्गम्। ततः स्वतः सिद्धप्रमाणभावयाऽद्वैतप्रकरणपठितत्वेन ब्रह्मण एवाकाशादेरुत्पत्तिप्रलयाभिधानेन पृथग् वस्तुत्वाभावप्रतिपादनपरया विरोधादनुमा न प्रमाणम्। किञ्च आकाशोऽनित्यो महाभूतत्वात् पृथिव्यादिवदिति मदुक्तहेतुस्तवापि संप्रतिपन्नः,। त्वदुक्तस्तु ममासंप्रतिपन्न इति स एव बाध्यः।

। जन्यभावस्य कारणत्रयजन्यत्वनियमनिराकरणम् ।

ननु यज्जायते तत्समवाय्यसमवायिनिमित्ताख्यकारणत्रयाज्जायते। तत्र यत्समवेतं कार्यं (जायते) तत् समवायिकारणम्। कार्यप्रत्यासन्नमवधृतसामर्थ्यम् असमवायिकारणम्। प्रत्यासन्नश्च द्विविधः-कार्यैकार्थसमवायः कारणैकार्थसमवायश्च। तन्तुसंयोगस्य स्वकार्येण पटेन सह तन्तुषु समवायस्य च निश्चितत्वात्। तन्तुगतरूपेणारभ्यमाणस्य पटगतरूपस्य समवायिकारणेन पटेन सह तन्तुष्वेव समवाय इति। समवाय्यसमवाय्यतिरिक्तं कार्योपगोगि निमित्तम्, न चैतत्त्रयमप्याकाशस्य दृश्यते। अतोऽजभावत्वान्नित्यमाकाशमिति। तदेतत्तार्किकाणां कोलाहलमात्रम्। तथाहि-सिद्धे समवायिकारणे तत्र कार्यस्य समवायः सिद्ध्यति, तसिद्धौ च समवायिकारणसिद्धिरिति परस्पराश्रयात्। समवायस्य च निरस्तत्वाद्दुर्निरूपं तावत् समवायिकारणम्। [2]समवायिकारणनिरासादेवासमवायिकारणमपि निरस्तम्। शब्दस्य च प्रदेशवृत्तेरन्योन्यावृत्तेश्चाव्याप्तिः। निमित्तं तूभयाधीननिरूपणमुभयनिराकरणेनैव निराकृतम्। नापि कारणत्रयात् कार्योत्पत्तिनियमः, कारणव्यापारे व्यभिचारात्। नचानेकमेव समवायिकारणम्, एकस्यापि क्षीरादेर्दध्यारम्भकत्वदर्शनात्। महाभूतानामिव च कार्यत्वमनुमायाकाशस्याप्यनुरूपानेककारणकल्पने को वारयिता? तस्मादसङ्गतमाकाशनित्यत्वानुमानम्[3] संकेतोऽप्याकाशशब्दस्यासंगत एव, प्रतिकल्पमाकाशव्यक्तिभेदात्तत्राऽनुगतजात्यभिधानोपपत्तेः। शब्दगुणेनाकाशस्य नित्यानुमेयत्वाभिधानमप्यसंगतमेव, अनुमानानभिज्ञानामपि गोपालमहिलादीनामाकाशे शकुनिः सञ्चरतीति प्रत्ययदर्शनात्-तस्मान्नित्यानुभवगोचर एवायं न तर्कगोचर इति स्थितम् ॥ ३३ ॥

। कालनिराकरणम् ।

यदपि लिङ्गबलात्कालमचीक्लृपत्-कालः परापरव्यतिकरयौगपद्ययौगपद्यचिरक्षिप्रप्रत्ययलिङ्ग इति, तदप्यलीकम्, तथाहि-परापरव्यतिकरो नाम दिक्कृतपरत्वाधारे यूनि अपरप्रत्ययः स्थविरे च दिक्कृतापरत्वाधारे परप्रत्यय इति व्यतिक्रमः। स चायं न वस्तुमात्रदर्शनलभ्यः, किन्तु कालाल्पत्वबहुत्वज्ञानपूर्वकः ततश्चेतरेतराश्रयं,

(1) न तस्य-का. (2) समवायनिरा-का. (3) नुशासनम्-का.

ज्ञाते काले लिङ्गावगमो लिङ्गावगमाच्च कालज्ञानमिति। किञ्चैककालकृतमनेकं युगपत्कृतमुच्यते, ततः कालैक्ये सर्वं युगपत्कृतमेवेति नायुगपत्प्रत्ययः स्यात्। अथ क्रियाभेदोपाधिककालभेदादयुगपत्प्रत्ययः, तर्ह्येककालकृतानेककर्मस्वयुगपत्प्रत्ययप्रसंगः।

अथ क्रमभाविक्रियाभेदोपाधिकः कालभेदः, तर्हि प्राप्तमितरेतराश्रयत्वम्। सिद्धे कालभेदे क्रियाणां क्रमभावित्वं सिद्ध्यति; तत्सिद्धौ च कालभेदसिद्धिरिति। चिरक्षिप्रप्रत्ययोऽपि कालाल्पत्वबहुत्वज्ञानसापेक्ष इति तत्रापि परस्पराश्रयत्वम्।

यच्चेदमनुमानं महत्वजातिर्दिगतिरिक्तशश्वद्विशेषगुणशून्याधिकरणवृत्तिः, परिमाणतारतम्यविश्रामास्पदजातित्वादणुत्ववदिति; तदपि न कालं कलयति, महत्परिमाणगुणे सिद्धसाधनत्वात्। द्रव्यविशेषणे चाप्रसिद्धविशेषणता; भट्टदृष्ट्या च सिद्धसाधनं तैर्मनसो विभुत्वाङ्गीकारात्, जातेश्च धर्मित्वेन जातित्वावृत्तेरसिद्धो हेतुः, साध्यविकलश्चास्माकं दृष्टान्तः। तस्मात्सूर्योदयादिसद्भावे प्रातःकालादिप्रसिद्धेः सूर्योदयादिक्रियाधर्म एव कालः साक्षिसिद्धोऽभ्युपेयः ॥ ३४ ॥

। दिङ्निराकरणम् ।

यदपि परापरप्रत्ययलिङ्गेन दिङ्निरूपणं तदपीतरेतराश्रयग्रस्तम्। देशो हि दिक्; तथा च देशभेदप्रत्ययपूर्वकः परापरप्रत्ययः, तद्बलाच्च देशभेदसिद्धिरिति दुस्तरमितरेतराश्रयसागरं प्रविष्टः कथङ्कारं तार्किकवराको निस्तरिष्यति।

किञ्चैकां दिशं परिकल्प्य प्राच्यादिविभागः सूर्यखयोगभेदोपाधिकः परिकल्पितः। तद्वरं परिकल्पितनभोभाग एव सवितृसंयोगविभागकृतोऽयं दिग्विभागव्यवहारः कल्पनालाघवात्। मानान्तरानभिज्ञानां दिगभिज्ञादिदर्शनात् नित्यानुमेयता दिगादेर्नाविकल्पते ॥ ३४ ॥

। आत्मपदार्थद्वैविध्यखण्डनम् ।

यदप्यात्मपदार्थस्य द्वैविध्यनिरूपणं—सर्वज्ञ ईश्वरो नित्यज्ञानेच्छाप्रयत्नादिशाली; जीवस्तु ततो भिन्नोऽनित्येच्छादिमाननन्तः। तथा च प्रयोगः—जीवेश्वरौ भिन्नौ विरुद्धधर्माक्रान्तत्वाद्दहनतुहिनवदिति। तत्र व्यावहारिकभेदाभ्युपगमात्सिद्धसाधनम्, तत्त्वतो भिन्नांविति विशेषणे बिम्बप्रतिबिम्बयोरनैकान्तिको हेतुः।

। जीवेशभेदनिराकरणम् ।

अयमात्मा ब्रह्मेत्यादिश्रुतिविरोधश्च। साध्यविकलश्च दृष्टान्तः। किञ्चैकस्मिन धर्मिणि विरोधानुपलब्धेः सिद्धे भेदे विरुद्धधर्माक्रान्तत्वम्, ततश्च भेदसिद्धिरिति परस्पराश्रयादसिद्धो हेतुः। यदपि सर्वज्ञत्वं जीवविरुद्धधर्मवत्वम्, तदपि नित्यज्ञाने न

सिद्धयति स्वातन्त्र्याद्ययोगात् । स्वतन्त्रो हि क्रियायां कर्तोच्यते, यथा गमने गन्ता। न च नित्यं ज्ञानं प्रति स्वातन्त्र्यसंभवः । अथ स्वाश्रयज्ञानस्य सर्वविषयत्वात्सर्वज्ञत्वम् । न, स्वाविषयत्वात्, ज्ञानस्य [1]स्वविषयेण साक्षात्सम्बन्धासंभवात् स्वाश्रयसंयोगात् सम्बन्धे जीवस्यापि सर्वज्ञत्वप्रसंगाच्च न वैधर्म्यसंभव । न चेच्छादेर्नित्यत्वे प्रमाणमस्ति, अनित्यत्वे चास्ति सामान्यतो दृष्टम् । तस्मान्न जीवेश्वरयोर्विरुद्धधर्माक्रान्तत्वेन भेदसिद्धिः । न च जीवस्य प्रतिशरीरं तात्विकभेदे मानमस्ति ।

। आत्मभेदसाधकानुमाननिराकरणम् ।

यश्चायं प्रयोगः—आत्मा द्रव्यत्वव्यतिरिक्तापरजात्याधारोऽश्रावणविशेषगुणाधिकरणत्वात् पटवदिति, तत्र आत्मशब्देन जातेः पक्षीकरणं व्यक्तेर्वा ? आद्येऽसिद्धान्तः, द्वितीये सन्दिग्धविशेष्यः पक्षाभासो जात्याश्रारत्वे सन्दिग्धे व्यक्तिसंदेहात् । अथ प्रमित एव धर्मीति **तार्किकाभिमानं** हित्वा लोकप्रसिद्धस्यात्मपदार्थस्य पक्षत्वकक्षीकरणम्, तदा लोके देहादेरेवात्मप्रसिद्धेः सिद्धसाधनम् । किञ्चेश्वरो द्रव्यत्वव्यतिरिक्तापरजात्याधारः; अश्रावणविशेषगुणाधिकरणत्वात्पटवदित्यतिप्रसङ्गलक्षणप्रतिकूलतर्कपराहतत्वात्, अनुकूलतर्कविरहाच्चाप्रयोजको हेतुः, सुखादिसंसर्गनिराकरणाच्चासिद्धिः । एतेनेदमपास्तम्—आत्मा द्रव्यत्वातिरिक्तापरजात्याधारः शरीरात्मसम्बन्धाधारत्वाच्छरीरवदिति । यच्च प्रयोगान्तरं विवादपदानि शरीराणि स्वसंख्यासंख्येयात्मवन्ति जीवशरीरत्वात्संप्रतिपन्नवदिति, तदपि सिद्धसाधनम्, एकत्वसंख्याया अपि स्वकीयत्वात् । अथ स्वसमवेतसकलसंख्यासंख्येयात्मवत्वं साध्यते, तदा साध्यविकलो दृष्टान्तः । यच्च प्रयोगान्तरं अपरोक्षज्ञानं वर्तमान-परोक्ष ज्ञानाश्रयाद्भिन्नाश्रयम्, परतन्त्रत्वे सत्यपरोक्षत्वात् रूपवदिति, तदपि सिद्धसाधनम्, औपाधिकात्मभेदाभ्युपगमात् । अननुसन्धानमप्यौपाधिकभेदादेवोपपन्नम्; बद्धमुक्तादिव्यवस्थापि तत एवोपपन्ना । तस्मात्तात्विकात्मभेदे प्रमाणादर्शनात् तत्कल्पनं स्वसिद्धान्तश्रद्धामात्रविजृम्भितम् ।। ३५ ।।

। मनोनिराकरणम् ।

यच्च नित्यं निरयवं परमाणुपरिमाणं मन इति निरूपणम्, तदप्यन्नमयं हि सौम्य मनः एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेत्यादिश्रुतिविरुद्धम्; करणत्वाच्च क्षुरादिवन्न परमाणुपरिमाणत्वम् । नित्यत्वनिरवयवत्वनिराकरणञ्च परमाणुवादोक्तमनुसन्धेयम् । मनः परमाणुपरिमाणं परविशेषगुणासमवायिसमवायित्वे सति नित्यत्वात् संप्रतिपन्नवदित्यप्यसाधुः, हेतोरसिद्धत्वात् द्व्यणुकसमवायित्वोपाधिहतत्वाच्च । सदा स्पर्शहीनद्रव्यत्वं चासिद्धम्, अनुद्भूतस्पर्शवत्त्वाङ्गीकारात् । मध्यमपरिमाणत्वे चोपचयादिमत्त्वम्, तस्मान्न द्रव्यनिरूपणं **तार्किकं**मन्यस्य, न तर्कनिपुणस्येति स्थितम् । ३६ ।।

(1) विषयेण—का.

। तमसोऽतिरिक्तद्रव्यत्वसाधनम् ।

किञ्च यौष्माकीनद्रव्यलक्षणपर्यालोचनया तमसो द्रव्यत्वावगमान्न नवैव द्रव्याणि। तथाहि–तमो द्रव्यम्, रूपवत्त्वान्मेघवत्। न च तमसोऽप्रामाणिकत्वादाश्रयासिद्धिः, विप्रतिपत्त्यालम्बनत्वेनाश्रयत्वोपपत्तेः प्रमाणविशेषणवैफल्यात्, अम्भःसंभारगंभीरप्रावृडंभोदवद्विशिष्टरूपवत्ताया नित्यानुभवगम्यत्वान्न स्वरूपासिद्धिः।

ननु रूपवद् द्रव्यं स्पर्शवत्त्वेन व्याप्तं तमसश्च स्पर्शानुपलब्धेर्व्यापकानुपलब्धिबाधः। न, त्र्यणुकवत्तमसोऽनुद्भूतस्पर्शवत्त्वाभ्युपगमात्। न चारंभकविरहेणाद्रव्यत्वं वाच्यम्, विद्युदादाविवानुरूपारम्भकानुमानसंभवात्।

यच्चावादि प्रकाशसंसर्गाभावः तम इति, तदपि मानहीनम्, यद्यंन्धकारावष्टब्धे देशे प्रकाशादर्शनात् प्रकाशसंसर्गाभावोऽन्धकार इत्यभिदध्यात्, तर्हि प्रकाशावष्टब्धे देशे तमसोऽप्यदर्शनात्तमः संसर्गाभावः प्रकाश इत्यभिधीयताम्। किञ्च, संयुक्तविशेषणतया तार्किकाणामभावोऽध्यक्षेणैवाध्यवसीयते। न चान्धकारावष्टब्धे देशेऽक्षसंयोगः संभवी। येनेह प्रकाशो नास्तीति प्रमीयमाणप्रकाशसंसर्गाभावोऽन्धकारः स्यात्। किञ्च तमो न प्रकाशसंसर्गाभावः, प्रकाशजातीयसहभावित्वात् घटवन्मन्दप्रदीपे वेश्मन्यस्पष्टरूपदर्शनेन तमसोऽपि तत्रानुवृत्तिदर्शनान्नासिद्धिः। यदि तत्र प्रकाशान्तराभावादस्पष्टं रूपदर्शनम्, तर्हि न कदाचित्स्पष्टं रूपं दृश्यते। अतः सिद्धं तमसो द्रव्यत्वम्। छायाया अपि द्रव्यत्वमेवावगन्तव्यम्।

तस्मात्**काणाद**राद्धान्तप्रसिद्धानि नवैव न।
द्रव्याणि मानहीनत्वान्न्यूनाधिक्यप्रदर्शनात् ॥ ३७ ॥

। गुणलक्षणखण्डनम् ।

यदपि निर्गुण इत्यादि गुणलक्षणं तदपि परस्पराश्रयग्रस्तम्, सिद्धे गुणलक्षणे गुणप्रतियोगिकनिर्गुणत्वनिर्णयः, ततश्च गुणलक्षणसिद्धिरिति। यदपि रूपत्वसम्बन्धाद्रूपमित्यादिनिरूपणं तदपि दुःसंपादम्, रूपव्यक्तिभेदसिद्धौ रूपत्वसिद्धिस्तत्सम्बन्धाच्च रूपव्यक्तिभेदसिद्धिरिति परस्पराधीनसिद्धिकत्वात्।

किञ्च चतुर्विंशतिसंख्या नाम गुणः तदाश्रयत्वे गुणानामपि द्रव्यत्वप्रसंगः। न चोपचारे कारणं पश्यामः। क्रौर्यादिगुणयोगाद्धि देवदत्ते सिंहशब्दस्योपचारो दृष्टः संख्याविशेषोपचारे च न द्रव्यसम्बन्धमात्रं कारणमतिप्रसंगात्। न च न्यूनाधिकसंख्यानिवारणाय चतुर्विंशतिसंकीर्तनं तत्सम्बन्धाभिधानमन्तरेणेतरनिवारणस्याशक्यत्वात्संख्याहीनत्ववचनस्य लघुत्वाच्च।

काणादपरिपठितगुणातिरिक्तानां च क्रौर्यशौर्यादीनामुपलम्भाच्चतुर्विंशत्यनुशासनं शिष्यानुशासनमात्रम् ।

। कर्मणां पञ्चविधत्वानुपपत्तिः ।

कर्म्मणामपि पञ्चत्वाभिधानं तथैव, भ्रमणोर्ध्वज्वलनतिर्यक्चलनादेरप्युपलम्भात्, तस्यापि गमनान्तर्भावकल्पने तदेवैकं कर्म स्यात्, उत्क्षेपणादेरपि तत्रान्तर्भावस्य वक्तुं शक्यत्वात् । गमनमपि गच्छतोऽगच्छतो वा दुर्निरूपत्वात्प्रतीतिमात्रगोचरमेव । न च सा नास्ति चलतीति प्रत्ययस्य प्रत्यक्षत्वात् । न चासौ संयोगविभागावलम्बनः खगगगनसंयोगस्याप्रत्यक्षत्वात् । अत एव न संयोगादिदर्शनानुमेया क्रिया । संयोगविभागौ सातिशयकारणजन्यौ कार्यत्वात् घटवत् इत्यनुमानम्, यतः क्रियोदयस्तत एव संयोगाद्युदयादप्रयोजकत्वम्, साध्यातिशये चानेकान्तोऽनवस्था वा ।

। सामान्यनिराकरणम् ।

सामान्यद्वैविध्यमपि परस्पराश्रयपराहृतम्, न्यूनाधिकवृत्तित्वयोरितरेतरानपेक्षयोरसिद्धेः । सामान्यस्य व्यक्तिसर्वगतत्वकल्पनमप्यसमञ्जसम्, संप्रत्युत्पन्नव्यक्तौ गोबुद्ध्यभावप्रसंगात् । न हि गोत्वजातिरन्यतस्तत्रागता, अमूर्तस्य स्वातन्त्र्येण गमनादर्शनात् । नष्टव्यक्तिदेशे गवादिषु सामान्यस्य नाशः स्वातन्त्र्यं वा प्रसज्येत, गत्यन्तराभावात् । तस्माज्जातिसाक्षात्कारस्य व्यक्तिपारतन्त्र्यमिति रमणीयम् । यच्चास्मदादिप्रत्यक्षेषु गवादिषु व्यावर्तकगोत्वादिवद्योगिप्रत्यक्षेषु नित्यद्रव्येषु तुल्यलक्षणेषु व्यावर्त्तकान्त्यविशेषपरिकल्पनम् । तदप्यलीकम् । व्यवृत्तिसिद्धौ ह्यन्त्यविशेषकल्पना, तद्बलात् व्यावृत्तिसिद्धिरिति परस्पराश्रयात् । व्यर्था चान्त्यविशेषकल्पना, पृथक्त्वगुणेनापि व्यावृत्तिव्यवहारोपपत्तेः । समवायश्च प्रागेव निरासि ।

तस्मात्काणादराद्धान्ते वीक्ष्यमाणेऽपि यत्नतः ।
द्वैतस्य दुर्निरूपत्वादद्वैतममृतायते ॥ २८ ॥

। गौतमोक्तषोडशपदार्थनिराकरणप्रारम्भः ।

। तत्र प्रमाणलक्षणखण्डनम् ।

यदि **नैयायिकेन** द्वैतं निरूप्यते, तर्हि तेनेत्थं न्यरूपि—प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानाख्यषोडशपदार्थात्मकं विश्वमिति, तदपि दुर्निरूपम् । तथाहि—तत्र यत्तावदिदं प्रमाणलक्षणं कश्चिदचीकल्पत्—सम्यगनुभवसाधनं प्रमाणमिति ।

। प्रमालक्षणखण्डनम् ।

तत्र सम्यगनुभवशब्देन किं सत्यार्थप्रतिभासो विवक्षित उताज्ञातार्थप्रतिभासः किं वा प्रमाभासातिरिक्तं ज्ञानम् ? प्रथमे स्मृतावतिव्याप्तिः। स्मृतिः संस्कारमात्रजन्या, तदतिरिक्तकारणजन्योऽनुभव इत्यप्यसाधुः। स्मृतावपि मनः संयोगादेः कारणत्वाभ्युपगमात्। स्मृत्यतिरिक्तं ज्ञानमनुभव इत्यपि प्रमाणेन व्यवस्थाप्यतेऽथवाऽप्रमाणेन? आद्ये परास्परराश्रयम्, सिद्धे प्रमाणलक्षणे तद्विशेषात् स्मृत्यतिरिक्तानुभवव्यवस्था, ततश्च प्रमाणलक्षणसिद्धिरिति। द्वितीये व्यर्थं प्रमाणनिरूपणम्, अप्रमाणादपि वस्तुव्यवस्थासिद्धेरिष्टत्वात्। किञ्च सत्यार्थत्वमपि प्रमाणादुताप्रमाणाद्वा ? आद्ये परस्पराश्रयम्, द्वितीये प्रमाणबलेनैव वस्तुसिद्धिरिति नियमहानिः। तस्माल्लोकसिद्धसत्यार्थव्यपाश्रयेण प्रमाणलक्षणाभिधाने भवत्येव स्मृतावव्याप्तिः।

किञ्चाद्वैतागमस्यैवं सति प्रामाण्यमापाद्येत द्वैतस्य सर्वस्यैवानृतत्वात्। द्वितीये धारावाहिकज्ञाने स्यादव्याप्तिः, तत्राप्युत्तरकालावच्छिन्नमज्ञातमेव वेद्यमिति चेन्न, कालस्य तवाप्रत्यक्षत्वात्। किञ्च न तावत् ज्ञाते घटे तस्याज्ञातत्वं ज्ञातुं शक्यम्। ज्ञातत्वविरोधात्, नाप्यज्ञाते तस्मिंस्तदवच्छिन्नाज्ञातत्वावगमः स्यात्। तर्हि ज्ञाते घटे तस्य पूर्वमज्ञातत्वमवगम्यताम्। न तावत् ज्ञातत्वमात्रात् पूर्वाज्ञातत्वसिद्धिः। स्मृत्यवगते तददर्शनात्[1]। नापि प्रामाणिकज्ञातत्वेनेतरातराश्रयात्। सिद्धेऽज्ञातत्वे प्रमाणेन ज्ञातत्वसिद्धिस्तद्बलाच्च पूर्वाज्ञातत्वसिद्धिरिति।

प्रमाणज्ञाप्यत्वे चाज्ञातत्वस्य प्रमाणज्ञेयत्वापातः[2] स्तम्भवत्। तस्मादज्ञातत्वानिरूपणान्नाज्ञातार्थप्रतिभासः सम्यगनुभवः। तृतीये तु स्फुटं परस्पराश्रयत्वम्। सिद्धे प्रमाशब्दाभिधेये सम्यगनुभवे तदाभाससिद्धिस्तत्सिद्धौ च तद्व्यावृत्तं ज्ञानं सम्यगनुभवः सिद्ध्यतीति। किञ्च सम्यगनुभवस्य साधनं करणं विवक्षितमुत कारणमात्रम् ? प्रथमे लिङ्गपरामर्शस्य निर्व्यापारत्वेन कारकविशेषरूपस्य कारणत्वस्यासंभवेनाप्रामाण्यप्रसंगः। न च लिङ्गस्यैव तत्र करणता, नष्टेऽपि लिङ्गेऽनुमानदर्शनात्। द्वितीये कालादावतिव्याप्तिः। किञ्च प्रमाणसामान्यस्येदं लक्षणम्। तत्राव्याप्तिः स्फुटैव। न हि सामान्यं साधनं व्यतिरेकाभावात्। अथ प्रमाणव्यक्तीनां साधारणत्वात् सामान्यलक्षणमुच्यते, तर्हीतरेतराश्रयत्वम्। एतल्लक्षणलक्षितत्वेन व्यक्तीनां प्रमाणव्यक्तित्वसिद्धिः प्रमाणव्यक्तिषु च सिद्धासु तासां साधारणमिदं लक्षणं सिध्यतीति।

। यथार्थज्ञानं प्रमा इति लक्षणनिराकरणम् ।

यच्च लक्षणान्तरं यथार्थज्ञानं प्रमाणमिति। तत्र यथार्थत्वमर्थमनतिक्रम्य वर्तनं सालम्बनत्वनियमो वा ? आद्येऽव्याप्तिः। अर्थमतिक्रम्य प्रमातर्येव ज्ञानस्य वर्तनात्

(1) स्तद्दर्शनात्–पु. (2) प्रमाणाहेयत्वापातः –का

अन्त्ये भ्रमादावतिव्याप्तिः, ज्ञायतेऽर्थोऽनेनेति ज्ञानम्, तत्कथमालम्बनाभावे स्यात्। अन्यथाऽतिप्रसंगोऽपि। तदुक्तं "अन्यथेयमनालम्बा लभमानोदयं क्वचित्। हन्यादेकप्रहारेण बाह्यार्थपरिकल्पनामिति।"

यदप्यनुभूतिः प्रमाणमिति प्रमाणलक्षणान्तरम्, तदप्यनुभूतिपदस्य सम्यगनुभवपदस्येवार्थं विकल्प्य पराकरणीयम्। तस्माद्दुर्निरूपं साधारणप्रमाणलक्षणम्॥ २९॥

। प्रत्यक्षलक्षणखण्डनम् ।

तस्मिंश्च दुर्निरूपे तद्भेदस्य प्रत्यक्षादेः सिद्धं दुर्निरूपत्वम्। तथापि किञ्चिदुच्यते। तत्र यदवादि—सम्यगपरोक्षानुभवसाधनं प्रत्यक्षम्। तद्द्विविधं—प्रकाशाद्यनुग्रहादिन्द्रियार्थसम्बन्धेन स्थूलार्थग्राहकमयोगिप्रत्यक्षम्।

सम्बन्धश्च षोढा—संयोगाद्द्रव्यग्रहणं संयुक्तसमवायाद्गुणादिग्रहणं तद्गतसामान्यज्ञानं स्वाश्रयग्राहकैरिन्द्रियैः संयुक्तसमवेतसमवायात्। श्रोत्रसमवायाच्छब्दग्रहणम्; समवेतसमवायाच्छब्दत्वग्रहणम्, विशेषणविशेष्यभावेनाभावसमवाययोर्ग्रहणम्। योगिप्रत्यक्षन्त्वतीन्द्रियार्थग्रहणमिति।

तदपि प्रक्रियामात्रम्, प्रमाणाभावात्। षोढा सम्बन्धेऽपि प्रमितिकार्यस्य योग्यताख्यसम्बन्धेनाप्युपपद्यमानस्य षोढासम्बन्धाबाधकता। द्रव्यादेश्च पूर्वं दुर्निरूपतोपपादनात् चक्षुः स्पर्शनयोर्घटादिद्रव्येण सम्बन्धः संयोग एवेत्ययं मन्त्रपाठ एव।

किञ्चासौ संयोगः किं स्वविशिष्टे बोधहेतुः? किं वा स्वोपलक्षिते? प्रथमे प्रत्यक्षाप्रत्यक्षयोः संयोगस्याप्रत्यक्षत्वात् घटाक्षसंयुक्तोऽप्रत्यक्षः स्यात्। अक्षञ्च प्रत्यक्षं स्यात्। द्वितीये सकृज्जातः संयोगः सदा पदार्थबोधमादध्यात्। किञ्च संयुक्तसमवायमात्राद्रूपस्य चाक्षुषत्वे रसादेरपि चाक्षुषत्वप्रसंगः; न च ते वस्तुस्वभावातिरेकिणी योग्यताऽतीन्द्रियास्ति। श्रोत्रे च नभोभागे समवायाच्च शब्दोपलम्भो बधिरस्यापि स्यात्, अदृष्टवैकल्यादग्रहणं चातिप्रसङ्गि। व्यवहितोपलम्भाच्च। संशयासंभवस्तु समानः। प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति श्रुतिविरोधश्च। नाभावोऽक्षगम्यः षट्पदार्थातिरिक्तत्वादसत्वाद्वा नृश्रृङ्गवत्। अक्षसंयोगस्याक्षायोग्यत्वान्न तद्भावभावित्वग्रहणसंभवः। तुच्छस्य निषेधव्यवहाराश्रयत्वाभावे मूकता तत्र स्यात्। तस्मादविचारितसंसिद्धार्थेन्द्रियसंयोगादेवायोगिप्रत्यक्षं व्यवहाराङ्गमिति रमणीयम्।

। योगिप्रत्यक्षखण्डनम् ।

योगिप्रत्यक्षं यद्यपि धर्मोत्कर्षवशात् देशादिविप्रकृष्टमपि गोचरयति। तथापि स्वार्थमेव, मार्जारादिदृष्टीनामतिशयवत्त्वेऽपि स्वार्थ एव तद्दर्शनात्। न त्वयोग्यमदृश्यादि, मानाभावात्।

"प्रादात्तेषां स भगवान्दिव्यं चक्षुर्जनार्दनः"—इत्यादिपुराणमपि योग्यविश्वरूपादिदर्शन एवातिशयं दर्शयतीति। यच्चेदमनुमानं—अदृष्टादि कस्यचित्प्रत्यक्षं प्रमेयत्वात्। **मीमांसकानाम**प्रत्यक्षत्वाद्वाऽस्मत्सुखादिवदिति तदप्यमानम्, सन्दिग्धाश्रयासिद्धत्वाद्धेतोः, नो खल्वदृष्टादिव्यक्तीनामनन्तानामतीन्द्रियाणामेकेन प्रमाणेन धर्मित्वेन निश्चयः शक्यःकर्तुम्। न च बहूनां प्रमाणानां संभूय धर्मिनिश्चायकत्वं संबोभाव्यते स्वगोचरशूरत्वात्सर्वेषाम्। न चैकस्यैव धर्मित्वमिति वाच्यम्, अन्येषामपि प्रत्यक्षत्वे विशेषणवैयर्थ्यादप्रत्यक्षत्वे तत्रैव व्यभिचारात्। किञ्च कस्यचिच्छब्दस्यानिर्धारितार्थत्वात्तद्विशेषितं प्रत्यक्षत्वमप्यप्रमितमित्यप्रसिद्धविशेषणत्वमक्षस्य, विपक्षबाधकाभावाच्चाप्रयोजको हेतुरित्यलम्।

। सविकल्पकनिर्विकल्पकप्रत्यक्षखण्डनम् ।

यच्चापरं प्रत्यक्षस्य द्वैविध्यं निरधारि-संज्ञासंज्ञिसम्बन्धोल्लेखेन ज्ञानोत्पत्तिनिमित्तं सविकल्पकम्, वस्तुमात्रावभासकं निर्विकल्पकमिति। तत्र सविकल्पके तावत्संज्ञासंज्ञिसम्बन्धः किं ज्ञानविषयतयोपयुज्यते किं वा निमित्ततया? आद्ये सविकल्पकज्ञानमचाक्षुषं स्यात्संज्ञासंज्ञिसम्बन्धस्याचाक्षुषत्वात्। द्वितीये संज्ञासम्बन्धस्यान्यत्र ज्ञातस्यैव निमित्तत्वदर्शनादिहापि तज्ज्ञानं वाच्यम्। न च केवलेन मनसा संज्ञासंज्ञिसम्बन्धबोधः। स्मरणमपि संस्कारोद्बोधस्यानियतत्वादनियतमिति स्फीतालोक मध्य मध्यासीनस्य समनस्केन्द्रियसन्निकर्षेऽपि कदाचित्सविकल्पकोपलम्भो न संबोभूयात्, संज्ञायाश्चाचाक्षुषत्वात्संज्ञिदर्शनायोगात्, न तद्दर्शनात्संस्कारोद्बोध इति। भिन्नज्ञानं सविकल्पकमित्यप्यलीकम्, भेदसिद्धेः प्रतियोग्यपेक्षत्वात्सिद्धभेदस्यैव च प्रतियोगित्वात्परस्पराश्रयापातात्। तस्माज्जलतरङ्गचन्द्रभेदावभासवत्सविकल्पकं प्रत्यक्षमलीकनिर्भास एव। निर्विकल्पेऽपि वस्तुमात्रावभासशब्देन वस्तुत्वसामान्यग्रहो विवक्षितःकिं वाऽनवच्छिन्नग्रहः?

नाद्योऽनवद्यः, सामान्यस्यानुगतप्रत्ययालम्बनत्वादनुगतस्य च भेदसिध्यपेक्षस्य प्रथमाक्षसन्निपातादसिद्धेः, द्वितीयोऽपि सावद्य एव, अनवच्छेदस्य सप्रतियोगिकत्वेन प्रतियोगिग्रहं विना ग्रहायोगात्। किञ्च निरुपचरितेऽनवच्छेदेऽक्षसंयोगोऽप्यभागी, व्यावृत्त एव संयोगदर्शनादव्यावृत्ते तु किं केन संयुज्यते ॥३०॥

। अनुमानलक्षणखण्डनम् ।

एवं प्रमाणयाथात्म्यनिर्णये दुर्निरूपता।
प्रत्यक्षेऽज्ञापि विस्पष्टाऽनुमाने ज्ञाप्स्यतेऽधुना।

सम्यगविनाभावेन परोक्षानुभवसाधनमनुमानम्। यथा पर्वतोऽग्निमान् धूमवात्वात्, महानसवदिति। तत्र किमग्निमत्त्वमात्रानुभवसाधनमनुमानम्, किंवा पर्वतावच्छिन्नाग्निमत्त्वानुभवसाधनम्? आद्येऽग्निमत्त्वमात्रस्य प्रत्यक्षेण

सिद्धत्वादनुमानस्य तत्स्मारकत्वादनुमानमनुभवसाधनं न भवतीत्यव्याप्तिः। द्वितीयेऽप्यव्याप्तिरेव। पर्वतावच्छिन्नाग्निमत्त्वेन धूमवत्त्वस्याविनाभावाग्रहणान्नाविनाभावेन तदनुभवसाधनं यतः।

। अनुमाने रूपद्वयनिषेधः ।

एतेनेदमपास्तं यदुदयनादिना जगल्भे-द्वयमनुमानस्य रूपं व्याप्तिःपक्षधर्मता च। तत्र व्याप्तिबलात् सामान्यसिद्धिः। पक्षधर्मताबलाच्च विशेषसिद्धिरिति। लक्षणस्यैकैकस्मिन्नंशेऽव्यापकत्वादेकं द्विरूपमिति च विप्रतिषेधात्। अग्निं विना धूमस्याभवनं व्याप्तिपदार्थस्तस्याभावस्य प्रमाणस्वरूपत्वायोगात्। धर्मद्वयस्यापि भेदादिविकल्पासहत्वात्।

ननु संस्काराक्षसंप्रयोगयोः प्रत्यभिज्ञासाधनत्ववत् व्याप्तिपक्षधर्मत्वयोः समुदितयोरनुमाने साधनत्वम्। तर्हि गतं लक्षणं सुस्थितत्वादव्याप्तेः। साधनत्वमपि न समुदितयोः, तत्वतः समुदायस्य वस्त्वतिरिक्तस्य तवाभावात्, व्याप्तिस्मरणस्य पक्षधर्मताग्रहणस्य च क्रमभावित्वात्।

संस्कारस्य च अप्रत्यक्षत्वादविनाभावसंस्कारसहितं पक्षधर्मताज्ञानमप्रत्यक्षमिति ज्ञातात्साधनादनुमानप्रसिद्धिर्बाध्येत। व्याप्तिपक्षधर्मताविशिष्टं लिङ्गमनुमानमित्यपीतरेतराश्रयग्रस्तम्॥ ३२॥

। अविनाभावस्य दुर्निरूपत्वसाधनम् ।

अविनाभावोऽपि न निरूपणं सहते।

व्याप्त्याख्यं ह्यविनाभावं व्याचचक्षे स्वभावतः।

साध्येन साधनस्य व्याप्तिरविनाभावः। स द्विविधोऽन्वयव्यतिरेकभेदात्। साध्यसामान्येन साधनसामान्यस्य व्याप्तिरन्वयः। साधनसामान्याभावेन साध्यसामान्याभावस्य व्याप्तिर्व्यतिरेक इति। तन्न।

स्वभावशब्दार्थाननुगमादव्याप्तिः। यदि स्वभावत इत्यनौपाधिकत्वं विवक्षितम्, उपाधिश्च साधनाव्यापकत्वे सति साध्यसमव्याप्तिः। तत्र व्याप्तिसिद्धावुपाधिसिद्धिस्तत्सिद्धौ च तदभावविशिष्टव्याप्तिसिद्धिरिति दुरुत्तरं परस्पराश्रयसागरं प्रविष्टः कथङ्कारं तार्किकवराको निस्तरिष्यति। अथोपाधेर्लक्षणे सहभावमात्रं व्याप्तिपदार्थः तर्हि स एव सर्वत्रास्तु, अर्धजरतीयस्यान्याय्यत्वात्। मैत्रातनयत्वादेरप्याबाधं प्रामाण्यमस्तु। दृश्यते हि पुरुषधौरेयपरिगृहीतप्रामाण्यमप्यनुमानं बाधेन जेघ्रीयमाणप्रामाण्यम्, ततो नातिप्रसङ्गोऽप्युपाध्यभावे, अन्यथा तवेश्वरानुमानस्यापि भङ्गप्रसंगः। शरीरिजन्यत्वो-

पाधिहतत्वात्, अतिव्यापकत्वं चात्र प्रसरीसर्ति। सर्वानुमानेषु च तत्तत्सपक्षत्वस्योपाधितापातः।

ननु सकर्तृकत्वशरीरजन्यत्वयोर्नास्ति व्याप्तिर्बाधकतर्काभावादेव। अथ बाधकः कथं व्याप्तावुपयुज्यते? किं व्यभिचारशङ्कानिराकारणेन? किं वोपाधिशङ्कानिरसनेन? यद्याद्यस्तर्ह्युपाधिलक्षणपरीक्षणे न मनः खेदनीयं, व्यभिचारादर्शनमात्रेण व्याप्तिग्रहणसंभवाद्बाधकत्वशङ्कानिराससिद्धेः। यदि द्वितीयस्तदा चक्रकापत्तिः उपाधिलक्षणे सिद्धे तन्निराकरणेन बाधकस्य व्याप्त्युपयोगित्वम्, सति च तस्मिन्निहं तदभावाद्व्याप्तिः। ततश्चोपाधिलक्षणसिद्धिरिति। किञ्च पक्षे साध्यसंभावनायामप्युपाध्यभावानिश्चयात् व्यभिचारशङ्कया न व्याप्तिनिश्चयः। तस्माद्यथाप्रसिद्धं साध्यसाधनसम्बन्धमविनाभावं विहाय दुर्निरूपोऽविनाभाव इति ॥ ३२ ॥

। लिङ्गप्रभेदानां खण्डनम् ।

यच्च व्याचचक्षे साधनं लिङ्गं तद्द्विविधं दृष्टं सामान्यतो दृष्टञ्च। तत्र प्रत्यक्षयोग्यार्थानुमापकं दृष्टं धूमवत्। स्वभावविप्रकृष्टार्थानुमापकं सामान्यतो दृष्टं यथा रूपादिज्ञानं चक्षुरादेरिति। तदसाधु। अतीन्द्रियार्थेन व्याप्तिग्रहणासंभवात्, अव्याप्तस्य च गमकत्वेऽतिप्रसङ्गात्, पक्षधर्मताऽपि व्याप्यस्य स्वव्यापकस्य तत्सम्बन्धमात्रं गमयति। नाणुमात्रमप्यधिकम्। नो खलु शीतलाग्निसम्बन्धं पक्षधर्मताबलादपि धूमो बोधयति हिमालयस्य। तस्मात्क्रिया करणपूर्विकेति सहभावदर्शनाद्रूपादिज्ञानक्रियया करणमात्रं सिद्ध्यति। चक्षुष्ट्वादिविशेषस्तु मानान्तरलभ्य एवेति न लिङ्गद्वैविध्यम्।

। स्वार्थपरार्थभेदेनानुमानद्वैविध्यखण्डनम् ।

यदप्यनुमानद्वैविध्यं व्याख्यायि परोपदेशानपेक्षं स्वार्थं परोपदेशापेक्षं परार्थम्। परोपदेशस्तु पञ्चावयवं वाक्यं प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा इति। तदप्यचारु। निरवयवस्य वाक्यस्य पञ्चावयवत्वानुपपत्तेः। अर्थविभागोपाधिकं सावयवत्वमिति चेत्तर्हि नगरादिपदानामनन्तावयवत्वप्रसङ्गात्। तस्मात्कल्पितमेव पञ्चावयवत्वं ते व्यवहाराङ्गम्। तत्किं कल्पितमेव व्यावहाराङ्गं ब्रुवाणमद्वैतवादिनं द्वेष्टि भवान्? किञ्च साध्यनिर्देशरूपप्रतिज्ञासिद्धौ साध्याधीननिरूपणसाधननिर्देशो हेतुः सिद्ध्यति। तत्सिद्धौ च हेतोः साध्येन व्याप्तिग्रहणस्थानमुदाहरणं सिद्ध्यति, तत्सिद्धौ च तत्र गृहीताविनाभावस्य हेतोः पक्षधर्मताख्यापकं वचनमुपनयः सिद्ध्यति, तद्बलाच्च पक्षधर्मताविशिष्टाद्धेतोः साध्यावधारणं नाम निगमनं प्रतिपक्षप्रमाणाभावसूचकं सिद्ध्यति, सिद्धे च निगमने तद्बलात्प्रतिपक्षप्रमाणाभावे प्रतिज्ञासिद्धिः॥ ३३ ॥

सति हि प्रतिपक्षप्रमाणे तद्विरोधान्न प्रतिज्ञाऽङ्गं दरीधर्ति। तस्मात्पञ्चानामप्यवयवानां परस्परायत्तसिद्धिकत्वेन कल्पनामात्रत्वादवयवानुमानमपि ते कल्पितमेव

व्यवहाराङ्गं; व्याप्तिबलेनैव च साध्यसिद्धौ व्यर्थमितरत्।

। अनुमानत्रैविध्यखण्डनम् ।

यच्च हेतोस्त्रैविध्यं व्यधायि-पक्षव्यापकः सपक्षवृत्तिरविद्यमानविपक्षः केवलान्वयी, पक्षव्यापकोऽविद्यमानसपक्षो विपक्षात्व्यावृत्तः केवलव्यतिरेकी। पञ्चरूपोऽन्वयव्यतिरेकी। रूपाणि तु पक्षधर्मत्वं सपक्षे सत्वं विपक्षात्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वञ्चेति। तदपि चक्रकक्रकचचूर्णीकृतं न प्रमाणं चरीकर्ति। सिद्धे पक्षे तद्व्यापकहेतुरूपं सिद्धयति; तथाभूतरूपविशिष्टाच्च हेतोः साध्यसिद्धः; तसिद्धौ च साध्यधर्मविशिष्टो धर्मी पक्षः सिद्धयति। सिद्धे सपक्षे तत्र सत्वं हेतुरूपं सिद्धयति। तथाभूताच्च हेतोः साध्यसिद्धिस्तत्सिद्धौ च साध्यसमानधर्माधर्मी सपक्षः सिद्धयतीत्येवं सर्वत्र योज्यम्। किञ्च स्वाभाविकान्वयेनैव साध्यसिद्धौ सतोऽपि व्यतिरेकस्यानुपयोगात्। केवलव्याप्तिबलेनैव साध्यसिद्धौ व्यर्थमितरत्। व्यतिरेकिनिरासाच्चान्वय्येव हेतुः।

। हेत्वाभासलक्षणस्य प्रभेदानां च खण्डनम् ।

यदपि हेतुलक्षणं परीक्ष्य हेत्वाभासपरीक्षणं—हेतुलक्षणरहितो हेतुवदवभासमानो हेत्वभासः। असिद्धविरुद्धानैकान्तिकानध्यवसितकालात्ययापदिष्टप्रकरणसमाः। तत्रानिश्चितपक्षवृत्तिरसिद्धः; पक्षविपक्षयोरेव वर्तमानो विरुद्धः; पक्षत्रयवृत्तिरनैकान्तिकः; साध्यसाधकः पक्ष एव वर्तमानोऽनध्यवसितः; प्रमाणबाधिते प्रतिज्ञातार्थे वर्तमानो हेतुः कालात्ययापदिष्टः; स्वपरपक्षसिद्धौ त्रिरूपो हेतुः प्रकरणसम इति। तदपि परस्पराश्रयपराहतम्। सिद्धे हेतुलक्षणे तदाभाससिद्धिः, तत्सिद्धौ च तदाभासव्यावर्तनेन हेतुलक्षणसिद्धिरिति। तथा सिद्धे पक्षे तत्रानिश्चितपक्षवृत्तिरसिद्धः सिद्धयति; तत्सिद्धौ च तद्व्यावृत्तहेतुबलात् पक्षसिद्धिरित्यूह्यं सर्वत्र, कालात्ययापदिष्टे च किं प्रतिज्ञातार्थ एव बाधकस्य विषयः? किं वा तद्विरुद्धः?

प्रथमे, न बाधः बाध्यबाधकस्वरूपयोरिव[1]। द्वितीयेऽपि तथा, न ह्येकत्रैव गगने विहगतदभावज्ञानयोर्विरुद्धार्थयोरपि स्वगोचरशूरयोर्बाध्यबाधकभावो दृष्टः। तस्मान्न ज्ञानगोचरस्य ज्ञानान्तरेणापहारो निरूपणं सहते। बहु चात्र वक्तव्यमस्ति। किन्तु ग्रन्थगौरवभयादुपरम्यते। तदेवं प्रत्यक्षानुमानयोर्दुर्निरूपत्वे मानान्तरस्यापि दुर्निरूपत्वं सिद्धमेव तस्य तन्मूलत्वात्॥ ३४॥

। प्रतिबन्दिनिरासः ।

ननु त्वयाऽपि प्रमाणेनैव व्यवह्रियते किं वा न? अहो मोहमहिमा, यदयं प्रमाणाप्रमाणविभागं निराकुर्वाणमद्वैतवादिनं परस्पराधीनसिद्धिकं तमेवोररीकृत्य

(1) P. स्वरूपयोरिव.

पृच्छति। किमत्र प्रमाणमिति च प्रश्नानुपपत्तिः, तद्बोधकत्वसिध्यसिध्योः, अन्यथा न प्रमाणं पृष्टं स्यात्। तात्विकत्वन्तु लोकसिद्धैर्वादिसिद्धैश्च न्यायैः पराक्रियते। नो खल्वालोकः स्वयं सत्यतया परिगृहीत एवान्धकारध्वंसं प्रयोजयति। नन्वनुमानं तु बोधकं[1] तत्तावत् तत्त्वावेदकमेव, अद्वैतागमवत्। न चेन्न तेन व्यवहारोऽपि। तत्किमिदानीं प्रतिवादिवाक्यमपि ते तत्त्वावेदकम् न चेत्ततो बोधस्तेन न व्यवहारः स्यात्। अद्वैतज्ञानस्य तु स्वरूपसत्यतारहितस्यापि तत्त्वावेदकत्वं तदर्थस्य बाधाविषयत्वेन व्यवह्रियते। तस्मादद्वैतवादिभिर्द्वैतवादिनां न तुल्यगतित्वम्, हंसेनेव टिट्टिभस्य। तदेवं प्रमाणपदार्थस्य दुर्निरूपत्वादनवस्थाभिया च प्रमाणं विनैव तत्सिद्धेरेष्टव्यत्वात् वस्तुसिद्धिः प्रमाणाधीनैवैति नैयायिकंमन्यस्य कुलधर्म एवेति स्थितम्। प्राक्च प्रमेयस्य दुर्निरूपता प्रादर्शि। यच्च प्रमाविषयः प्रमेयमिति लक्षणं, तदपि दुर्निरूपम्, परस्पराधीननिरूपणत्वात् सिद्धे प्रमेये यथार्थज्ञानं प्रमा सिद्ध्यति, तत्सिद्धौ च तद्व्यावृत्तप्रमेयसिद्धिरिति प्रमाणप्रमेययोर्दुर्निरूपत्वे सत्युत्तरेऽपि चतुर्दशपदार्थास्तदन्तर्भूता दुर्निरूपा एव भवन्ति। तथाप्यधिकं किञ्चिदुच्यते ॥ ३५ ॥

। संशयनिराकरणम् ।

यत्तावदनवधारणज्ञानं संशय इति लक्षणं तत्पराहतम्। ज्ञानञ्चेदवधारणमेव। यद्येवकारानुच्चारणादनवधारणं तर्हि घटोऽयमित्यादिज्ञानेऽतिव्याप्तिः। यदि कोटिद्वयावलम्बित्वेन, तदा समवायिनाशादसमवायिनाशा[2]द्वा नाश इत्यादिज्ञानेऽतिव्याप्तिः।

। तर्कखण्डनम् ।

व्याप्याङ्गीकारेण व्यापकाभावप्रसञ्जनेन व्याघातोद्भावनं तर्कः, स चानुमानाङ्गभूत इत्यपि परस्पराश्रयग्रस्तम्। सिद्धे तर्कस्याङ्गत्वेऽनुमानसिद्धिः, तत्सिद्धौ च तस्य तर्कोऽङ्गं सिद्ध्यति इति। बाधकाभावादप्रयोजकशब्दाभिधेयशङ्कोदये सिद्धे तन्निरासेन बाधकस्योपयोगः, सति च तस्मिंस्तदभावाच्छङ्कोदय इति च। व्याप्यारोपात् व्यापकारोपस्तर्क इति[3] प्रसंगानुमानेऽतिव्यापकम्, व्याप्तितर्कयोश्चेतरेतराश्रयादनवस्थानाद्वा, सहोपलम्यमूलत्वे सर्वत्र तथा किन्न स्यात्। यच्च संभावनाबुद्धिस्तर्क इति तत्रापि संभावनानिश्चये प्रामाण्यं भविष्यतीतिवदाकारभेदेऽपि तदनिश्चये न तद्बुद्धिः, संशयप्रसङ्गश्च। बाधकं च न वर्तत इति नैकरूप्येण तर्कलक्षणसिद्धिः। प्रशिथिलमूलत्वमनिष्टापादनस्येष्टापादनरूपत्वम्, विपर्ययापर्यवसायित्वमाश्रयहीनत्वं च तर्कदूषणमितरेतराश्रयग्रस्तम्। एतद्दोषरहिततर्कान्तरस्य गमकत्वसिद्धिः, तद्बलाच्चैतद्दोषसद्भावसिद्धिरिति ॥

(1) V. तत्त्वावे. (2) P. इत्यादि. (3) P. अतिप्रसंगानुमाने.

। वादकथानिराकरणम् ।

गुरुशिष्यभावेन पक्षप्रतिपक्षपरिग्रहेण वा प्रमाणतर्काभ्यां यत्र साधनोपालम्भौ क्रियेते, स तत्त्वनिर्णयावसानो वादो वीतरागकथा कथ्यते। यत्र विजिगीषुर्विजिगीषुणा सह लाभपूजाख्यातिकामो जयपराजयार्थं प्रवर्तते, वीतरागो वा तत्त्वज्ञानसंरक्षणार्थं स वादिप्रतिवादिसभापतिप्राश्निकाङ्गश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः। परस्खलितमात्रपर्यन्तः स प्रतिपक्षस्थापनाहीनो वितण्डेति। तदेतत्कथाङ्गत्रयं तार्किकस्य दुर्निरूपम्, वादिप्रतिवादिविभागस्य दुर्निरूपत्वान्निष्प्रयोजनञ्च, कथाङ्गीकारमन्तरेण कथायां विप्रतिपन्नस्य प्रतिबोधनवत्सद्युक्तिभिरेव विप्रतिपन्नस्य प्रतिबोधसंभवात्। लौकिकविवादेषु कथाङ्गीकारमन्तरेणैव जयफलदर्शनाच्च ॥ ३६ ॥

। छलनिराकरणम् ।

यच्च वक्तुरभिप्राया[1]परिज्ञानादर्थान्तरपरिग्रहेण प्रतिषेधः च्छलं यथा नवकम्बलोऽयं माणवक इत्युक्ते कुतोऽस्य नव कम्बला इति, तच्च न सदुत्तरम्, अभिप्रायापरिज्ञानादित्यवादि। तत्रोच्यते भवेदिदमसदुत्तरं यदि वक्त्रभिप्राय; शब्दार्थः स्यात्, नतु भवति बालेन स्वव्यवहारेऽनाकलितत्वान् वक्तुरभिप्रायस्य प्रवर्तकतया स्वोपमानेन श्रोतुरपि तमनुमाय तत्र संगतिग्रहणायोगात्। अपरथा मेरुं विवक्षन् सागरं ब्रूयात्, प्रतिपत्तिरपि ततो भवेत्; अनवच्छिन्नस्यातिप्रसङ्गित्वात्। तदवच्छिन्नत्वे च तदेवास्तु [अ] पदार्थत्वाच्च। मानान्तरानुपरणे च तत एव सिद्धेर्न शब्दार्थत्वम्। एतेन शब्दो लिङ्गमिति प्रत्युक्तम्। अतः शाब्दे व्यवहारे यथाशब्दं पुरः स्फूर्तिकेऽर्थे युक्त एवाऽऽक्षेपः, नतु वक्तुरभिप्रायानुसारेण दूषणभूषणे। अपरथा यो गिरेरग्निमत्तां साधयति तस्य तद्गतेनैवाग्निनाऽग्निमत्त्वमभिप्रेतमिति साध्यवैकल्प्यं प्रसज्येत। ततोऽभिप्रायापरिज्ञानान्न छलोक्तिरसदुत्तरम्। यदि मानान्तरविरुद्धाभिधानत्वेन च्छलत्वं तदाऽतिव्याप्तिः वह्निरनुष्ण इत्यादावित्यलं छलविलोकनेन ॥

। जातिलक्षणखण्डनम् ।

यच्च जातिलक्षणं प्रयुङ्क्ते—हेतौ समीकरणाभिप्रायेण प्रसंगो जातिरिति, तदतिव्याप्तिग्रस्तम्; पर्वतोऽग्निमान्धूमवत्त्वादित्यत्र धूमवत्त्वं भवतु, वह्निमत्त्वञ्च न भविष्यति, किं बाधकमित्युक्ते वह्निमत्त्वाभावेऽधूमवत्त्वप्रसंगः, गङ्गातरङ्गदेशवत्, इत्ययं बाधकस्तर्कः प्रतिदृष्टान्तसमीकरणाभिप्रायेणापि प्रसंगो भवतीत्यतिव्याप्तिः; गवादिजातौ च न वर्तत इत्यव्याप्तिः। अथालौकिकी जातिरत्र लक्ष्या, परस्पराश्रयं; न चेत्प्रमाणं वाच्यम्, संप्रतिपन्नेन हि प्रमाणेन विप्रतिपन्नो बोधनीयः। केवलव्यतिरेकी चाप्रसिद्धविशेषणत्वादिदोषदुष्ट इत्यगादि।

(1) P.–यादर्थान्तर

। जातिभेदखण्डनम् ।

यच्च साधर्म्यसमादयो जातिभेदा असदुत्तरत्वेनोदाहृताः, शब्दोऽनित्यः कृतकत्वात्पटवदित्युक्ते, यद्यनित्यपटसाधर्म्यात्कृतकत्वादनित्य इष्यते शब्दः, तर्हि नित्याकाशसाधर्म्यादमूर्त्तत्वान्नित्यः किं नेष्यते, अविशेषादिति साधर्म्यसमस्योदाहरणम्। यदि नित्याकाशवैधर्म्यात् कृतकत्वादनित्य इष्यते शब्दः, तर्ह्यनित्यपटवैधर्म्यादमूर्त्तत्वान्नित्यः किं नेष्यते वैधर्म्यसाम्यादिति वैधर्म्यसमस्योदाहरणम्; तत्र किं साधर्म्यसाम्यादिमात्रेणासदुत्तरत्वम्, किं वा व्यभिचारदर्शनमानान्तरविरोधादिलक्षणकारणान्तरवशेन? नाद्यो बाधकादर्शनात्। द्वितीये तदेवाभिदेधीयताम्। किमनेनाकिञ्चित्करेण साधर्म्य[1]समादिपरिभाषाकरणेन? नो खलु जल्पेऽपि विमलकलेवराणां वाङ्मात्रेण व्यामोहः संभवी[2]।

यच्चावोचत्—स्वपक्षव्याघातकरमुत्तरं जातिः; येन हि प्रकारेण परपक्षः प्रतिषिध्यते, स्वपक्षप्रतिषेधोऽपि तेनैव प्रकारेण सिद्ध्यतीति। तत्र किं तत्त्वतः प्रतिषेधो न सेधिष्यति, किंवा व्यवहारतोऽपि? प्रथमे नाद्वैतवादिनः किमपि जात्युत्तरं तावत्प्रसरीसर्ति, तस्य हि नाद्वैतातिरिक्तं तत्वमिति मतम्[3], प्रतिषेधस्यापि दुर्निरूपत्वं न स्वपक्षव्याघातकरम्। व्यवहारस्तु स्वप्नवद्भविष्यति; स्वप्नवदेव च प्रतिषेधस्यापि[4] दुर्निरूपत्वं न स्वपक्षव्याघातकरम्। व्यवहारस्तु स्वप्नवद्भविष्यति। स्वप्नवदेव च प्रतिषेधस्याप्यतात्विकत्वेऽपि न प्रतिषेध्यस्य सत्यत्वापातः; पूर्ववदेव चात्रापि प्रमाणाभावो वेदितव्यः। किञ्चानुकूलतर्काभावादप्रयोजकत्वशङ्कोत्तरेऽतिव्याप्तिः। शक्यते हि वक्तुं बाधकस्तर्को माभूत्, अप्रयोजकत्वञ्च न भविष्यति, किं बाधकमिति, [5]निर्बीजशङ्कावशस्य सर्वत्र पातसंभवादिति।

। निग्रहस्थानखण्डनम् ।

यच्च पराजयनिमित्तं निग्रहस्थानमप्रतिपत्तिविप्रतिपत्त्योर्विकल्पानन्त्येनानेकप्रकारम्; स्वप्रतिज्ञातविपरीतानुज्ञा प्रतिज्ञाहानिः, अविशेषेण प्रतिज्ञातस्य परेण प्रतिषेधे तत्रैव विशेषणकरणं प्रतिज्ञान्तरम्; हेत्वन्तरवत्प्रतिज्ञाहेत्वोर्विरोधः; पक्षप्रतिषेधे प्रतिज्ञातार्थापलापः प्रतिज्ञासंन्यासः। प्रतिज्ञानुपयोग्यभिधानमर्थान्तरम्। वर्णक्रमनिर्देशवन्निरर्थकम्। त्रिरभिहितमपि परिषत्प्रतिवादिभ्यामविज्ञानं अविज्ञातार्थम् शब्दार्थयोः पुनर्वचनं पुनरुक्तम्, अन्यत्रानुवादात् अर्थापन्नस्य स्वशब्देन पुनरभिधानञ्च। विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणं नाम प्रतिवादिनो निग्रहस्थानम्। कथामभ्युपगम्य तूष्णींभावोऽप्रतिभा वादिप्रतिवादिनोर्निग्रहस्थानम्; कार्यव्यासंगात्कथाविच्छेदो विक्षेपः; स्वपक्षे दोषमभ्युपगम्य परपक्षे दोषप्रसञ्जनं मतानुज्ञा; अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः; सिद्धान्तमभ्युपगम्यानियमेन

(1) P. समाधि. (2) P. संभवति. (3) P. संमतं.
(4) P. प्रतिषेवस्य. (5) P. निर्व्याज.

कथाप्रसङ्गोऽपसिद्धान्तः; हेत्वाभासाश्च यथोक्ताः साधनानुपयोगित्वेन; दुर्वचन-कपोलवादनादिकं च। नियमकथायां त्वपशब्दादिकमपीति।

। निग्रहस्थानखण्डनम् ।

तत्रोच्यते-क्वेदं मोहनास्त्रं भवताऽभ्यासि? न तावल्लोके, बन्धनागारादाविव तत्र निग्रहस्थानशब्दाप्रयोगात्तस्य च प्रतिज्ञाहान्यादौ योग्यानुपलब्धेरेवासंभवः, न च मानान्तरं किमप्यत्र पश्यामः, वस्तुतोऽन्यथाभावासंभवात् स्वरूपहान्यसंभवात्, अन्यहेतो-र्दुष्टत्वस्यातिप्रसंगित्वात् अन्योक्त्यनुक्त्योस्तथात्वात्। विशिष्टानिष्टेश्च दोषस्य भेदाभेद-सत्वासत्वस्वतस्त्वपरतस्त्वसम्बन्धत्वासम्बन्धत्वाद्यनिरूपणेन वस्तुसंस्पर्शित्वानुपपत्तेः; पराजयस्य पापफलत्वाच्च तत्राप्यतिव्याप्तिः स्फुटैव। प्रतिज्ञाहान्यादिना सिद्धे पराजये तन्निमित्तत्वान्निग्रहस्थानं सिद्ध्यति, तस्य च निग्रहस्थानत्वात् पराजयसिद्धिरिति च परस्पराश्रयम्। निग्रहस्थानवैकल्यान्न ममास्ति पराजयः। निरूपणासमर्थत्वात् सिद्धोऽन्योन्यपराजयः। यच्च कथाऽशक्तिसूचकं लक्षणान्तरम्, तदपि दुःस्वप्नादावति-व्याप्तिपराहतम्। तदेवं नैयायिकपरिकल्पितपदार्थभेदस्यापि दुर्निरूपत्वान्निर्विघ्नोऽद्वैत-ब्रह्मवादः॥ ३८॥

। साङ्ख्यमतनिरूपणम् ।

यदि कापिलेन द्वैतं निरूप्यते, सोऽपीत्थं निरूपयामास-सत्वरजस्तमसां साम्या-वस्था प्रधानं मुलप्रकृतिर्महदहंकारपञ्चभूततन्मात्राणि सप्त प्रकृतिविकृतयः। पञ्च ज्ञाने-न्द्रियाणि पञ्चकर्मेन्द्रियाणि पञ्च विषयाः बुद्ध्यादिशब्दाभिधेयं वृत्तिमदेकमन्तःकरणमिति षोडश विकाराः; पुरुषास्तु स्वभावनिर्मला उदासीना एवं पञ्चविंशतिस्तत्त्वानीति।

। सांख्यमतखण्डनम् ।

तदपि न चातुरीं धत्ते, प्रधानादिसद्भावे प्रमाणाभावात्; सर्वे भावाः सुखदुःख-मोहसामान्यप्रकृतिकाः, तदनुविद्धत्वान्मृदनुविद्धघटादिवदित्यनुमानमस्तीति चेन्न, "मायां तु प्रकृतिं विद्धि मायिनं तु महेश्वरम्" इतीश्वरोपाधिमायाप्रकृतिकत्वश्रुतिविरोधात्, असिद्धत्वाच्च हेतोः; नो खलु बाह्यानां शब्दादीनामान्तरसुखाद्यनुविद्धत्वं केनापि प्रमातुं शक्यम्। साध्यविकलश्च दृष्टान्तः। स्वतन्त्राचेतनस्य विचित्रकार्यरचनायां प्रवृत्तिश्चा-नुपपन्ना, शकटादीनामनडुदाद्यधिष्ठितानामेव प्रवृत्तिदर्शनात्; व्यर्था च असतो जातेः सतश्च नाशस्यानभ्युपगमात्। अभिव्यक्तिरपि सत्यसती वा न कार्या; अभिव्यक्तेश्चाभि-व्यक्त्यभ्युपगमेऽनवस्था। पराचक्रमिरे चात्राचार्याः प्रधानादिकल्पनस्य "आनुमानि-कमप्येकेषा" मित्यत्राश्रौतत्वं इत्युपरम्यते।

। इन्द्रियाणां आहङ्कारिकत्वनिरासः ।

यच्चाहंकारिकत्ववर्णनमिन्द्रियाणां, तदप्य "न्नमयं हि सौम्य मनः" इत्यादि

भौतिकत्वसूचकश्रुतिविरुद्धम्। पुराणमप्येवंविधेऽर्थे श्रुतिविरोधादुपेक्षणीयम्। पुरुषाणाञ्च सर्वथोदासीनत्वे न बन्धमोक्षभागित्वम्, अविवेकस्याप्यवस्तुत्वे न संसारकारणत्वम्, वस्तुत्वे न विवेकाद्विनाश आत्मवत्।

। पुरुषबहुत्वनिरासः ।

यच्च पुरुषाणामानन्त्यवर्णनं तदप्यविचारितरमणीयम्। तथा हि—भिन्नत्वे न तावद्वस्तुत आनन्त्यं वस्त्वन्तराद्व्यावृत्तत्वात्। अत एवानित्यत्वाद्घटवन्न देशतः कालतो वाऽऽनन्त्यम्। नचाज्ञातसंख्यत्वादानन्त्यं संदिग्धासिद्धत्वाद्धेतोः; नो खलु सकलपुरुषपरिचयम[1]न्तरेण तेषां संख्यापरिज्ञानं परिच्छेत्तुं पार्यते। "एको देवः सर्वभूतेषु गूढः" इत्यादिश्रुतिविरोधस्तु स्फुट एव। तस्मात्पुरुषा न तत्वतोऽनन्ताः, भिन्नत्वात्, एकप्राङ्गणनिहितमाषवदित्यलम्॥

। बौद्धमतखण्डनम् ।

यदि बौद्धेन द्वैतं निरूप्यते, तत्पक्षोऽपि त्रिधा भिद्यते बाह्यार्थवादः, विज्ञानमात्रवादः, शून्यवादश्चेति। तत्र यत्तावद्बाह्यार्थवादी मेने चतुर्विधाः परमाणवः खरस्नेहोष्णेरणस्वभावाः पृथिव्याद्याकारेण संहन्यन्ते, रूपविज्ञानवेदनासंज्ञासंस्काराश्च पञ्च स्कन्धा देहादिभावेनेति, तत्तावदसत्। तथा हि—द्विविधोऽयं संघातः स्वतः परतो वा संपद्यते?

नाद्यः, सदा प्रसङ्गित्वेन प्रलयाद्यभावापातात्। परतोऽपि न, स्थायिन ईश्वरात् तदनभ्युपगमात्। नाप्यालयविज्ञानात्, परस्पराश्रयापातात् संघातसिद्धावालयविज्ञानसिद्धिः, तद्वशाच्च संघातसिद्धिरिति। किञ्च, क्षणिकस्य निर्व्यापारत्वान्न संघातकर्तृत्वनिश्चयः।

। क्षणभङ्गभङ्गः ।

क्षणिकत्वमपि किं प्रत्यक्षादनुमानाद्वा? ननु प्रत्यक्षादेव, वर्तमानार्थावभासं हि प्रत्यक्षमवर्तमानात् व्यावृत्तिमपि बोधयति। नीलसंवेदनमिवानीलव्यावृत्तिम्। ततश्च वर्तमानक्षणमात्रसत्वं प्रत्यक्षमिति। नैतत् साधु, तथाहि-किं प्रत्यक्षं वर्तमानक्षणावच्छिन्नस्य तदैवावर्तमानताव्यावृत्तिं गमयति। किंवा क्षणान्तरेऽपि? प्रथमे न क्षणिकतासिद्धिः प्रत्यक्षात्, न हि युगपद्वर्तमानत्वमवर्तमानत्वञ्च स्थायिवादिनाप्यास्थीयते; कालान्तरेणाप्यवर्तमानताव्यावृत्तिबोधनं त्वशक्यम्; विरोधाभावात्। यत्सत्तत्क्षणिकम्, यथा प्रदीपः, सन्तश्चामी भावा इत्यनुमानात् क्षणिकत्वसिद्धिरिति चेन्न, साध्यविकलत्वात दृष्टान्तस्य, न हि पूर्वापरकालविकलत्वलक्षणं क्षणकत्वं प्रदीपस्य प्रमाणान्तरेण सिद्धम्।

(1) P. परिचयमात्रेण

ननु यद्यस्यावश्यंभावि नं तत्तस्य परापेक्षम्, यथा संविदः स्वप्रकाशत्वमवश्यंभावि-विनाशं[1] चेदमित्यनुमानात् स्वरसभङ्गुरत्वसिद्धिः। न, सूर्योदयास्तसमययोर्व्यभिचारात्। अन्यथोदयानन्तरमेवास्तमियात्।

यच्चोच्यते-न स्थायिनो युगपदर्थक्रियाकारित्वमुत्तरक्षणेऽर्थक्रियावैधुर्येणासत्व-प्रसंगात्। नापि क्रमेण, समर्थस्य क्षेपायोगात्। अतोऽर्थक्रियाकारित्वादेव क्षणिकत्व-सिद्धिरिति। तदसत्; सत्त्वस्य वस्तुस्वभावत्वात्[2]। अन्यथाऽर्थक्रियाकारित्वात् सत्वम्, सत्वे चार्थक्रियाकारित्वमिति परस्पराश्रयत्वम्। चरमक्षणस्य चासत्त्वप्रसंगः। स्वसंवेद्य-त्वाच्च संविदो न सार्वज्ञेऽपि स्वसंविज्जनकत्वम्। ततो नार्थक्रियाकारित्वेन सत्वमिति नोत्तरक्षणेऽसत्वप्रसंगः। क्रमवत्सहकारिसन्निधिबलाच्च क्रमेण स्थायिनां कार्यजनकत्वं दृश्यमानं नापलपनीयम्, कार्यकारणभावस्याप्यपलापापातात्। किं बहुना, सकलमपि क्षणिकतानुमानं प्रत्यभिज्ञाविरोधान्नैवाङ्गं धारयति। सादृश्यनिबन्धना सा भ्रान्तिरिति चेन्न, भेदे सिद्धे सादृश्यसिद्धिः, सादृश्याच्च प्रत्यभिज्ञाया भ्रान्तित्वम्, ततश्च भेदसि-द्धिरिति चक्रकापत्तेः।

सादृश्यमपि नात्यन्तविलक्षणानां क्षणानां संभवति। कथञ्च स्वयं क्षणिको बहूनां सादृश्यं पश्येत्? संततेः सांवृतसत्वेन तत्र सर्वो व्यवहार इति चेन्न, अर्थक्रियाका-रित्वे संततेः स्वलक्षणवत्परमार्थसत्त्वप्रसङ्गात्।

किञ्च क्षणिकत्वं तवापोहरूपम्, यथा गोत्वमगोव्यावृत्तिरूपम्; ततः किञ्चि-दक्षणिकमभ्युपेयम्; ततश्च परस्पराश्रयम्; सिद्धे क्षणिके तद्व्यावृत्तिरूपमक्षणिकं सिद्ध्यति, तस्मिंश्च सिद्धे तद्व्यावृत्तिरूपं क्षणिकत्वं सिद्ध्यतीति। क्षणिकानाञ्च प्रतियोगिनामान-न्त्यात्तदपोहोऽक्षणिकत्वं नासर्वज्ञेन निश्चेतुं शक्यते। किञ्च संविदः स्वसंवेद्यत्वान्न [3]तत्क्षणिकत्वमन्यतः सिद्ध्यति। संवित् संविदित्येकाकारपरिस्फुरणाच्च। न चाऽसिद्धे व्यक्तिभेदे सामान्यविषयत्वम् तस्मात्क्षणिकवस्त्वसिद्धेर्नत[1]त्समुदायरूपो बाह्योऽर्थः सिद्ध्यतीति सिद्धम्।

क्षणिकत्वप्रतिक्षेपादेव विज्ञानवादोऽप्यपोदितो वेदितव्यः।

। ज्ञानज्ञेयाभेदनिरासः ।

यच्च ज्ञानज्ञेययोरभेदाभिधानं तदप्यभद्रम्। तथा हि-किं ज्ञानस्य ज्ञेयमात्रत्वम्, ज्ञेयस्य वा ज्ञानमात्रत्वम्? प्रथमे ज्ञानस्यानित्यतापातः, प्रध्वंसादनित्यादभिन्नत्वात्, जगतश्चान्ध्यप्रसङ्गः, ज्ञेयांशस्य जाड्यात्स्वतः स्फुरणानुपपत्तेः। द्वितीये प्रध्वंसस्यापि भावत्वप्रसंगः भावरूपज्ञानादभिन्नत्वात्। सहोपलम्भोऽपि नाभेदसाधकः, उपायोपेयभा-

(1) P. तादृशं चेदं (2) P. स्वभावात् (3) P. क्षणिकत्वासिद्धेः

वेनाप्युपपत्तेः; प्रत्युत भेदमेव साधयति, सहोक्तेर्भिन्नावलम्बित्वात्। अतिप्रसंगश्च रूपालोकयोः, [1]ह्रस्वदीर्घयोश्चाभेदप्रसंगात्।

यच्चेदमनुमानं विवादाध्यासिताः प्रत्यया निरालम्बनाः प्रत्ययत्वात्स्वप्नप्रत्ययवदिति[2]। तत्र निरालम्बनत्वं किं परमार्थसत्यालम्बनवैधुर्यं साध्यते, किं वा प्रातिभासिकालम्बनवैधुर्यम्? प्रथमे सिद्धसाधनम्; चरमे साध्यविकलो दृष्टान्तः; प्रतिभासविरोधश्च, प्रतिभासत एव तवापि हि बाह्योऽर्थः, इतरथा यदन्तर्ज्ञेयं तत् बहिर्वदभासत इति वत्करणानुपपत्तिरिति।

शून्यवादिनोऽपि किं शून्यं स्वतः सिद्धम्, किं वा परतः? अग्रे नाममात्रे विगानम्, स्वतः सिद्धं हि वस्तु ब्रह्माचक्ष्महे प्रज्ञानं ब्रह्मेति शास्त्रात्। परतोऽपि [3]सम्बद्धाच्चेत् सिद्ध्यति तर्हि सम्बन्धाधिकरणतया निरात्मतालक्षणशून्यताव्याहतिः। असम्बद्धा चेदतिप्रसक्तिः। न च सर्वं शून्ये परिकल्पितम्, सदनुरक्तत्वात् यदनुरक्तं ह्यारोपितं भाति तदधिष्ठानं, यथा शुक्तीदमंशो रूप्यस्य। न च शून्यानुविद्धं किञ्चिच्चकास्ति।

तस्मात्त्रिविधबौद्धीयराद्धान्तध्वान्तरूपणे।
संदनीध्वस्यते द्वैतमद्वैतमवशिष्यते॥

। दिगम्बरजैनमतनिरासः ।

यदपि दिगम्बरेण द्वैतं न्यरूपि-जीवाजीवास्रवसंवरनिर्जरबन्धमोक्षाः सप्तैव पदार्था इति, सर्वत्र च सप्तभङ्गीनयो नाम न्यायो निरणायि, स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यः, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति चावक्तव्यश्चेति। तत्रैतद्वाच्यं-किमनेन न्यायेन सत्वादेर्दुर्निरूपत्वमुच्यते, किं वा व्यवहारेऽप्यनेकान्तात्मत्वमिति? तत्राद्ये न विवदामहे, यत अस्माकीनैरपि सत्वादेर्युक्तितो दुर्निरूपत्वमिष्यत एव। द्वितीये तु विवदामाहे, परस्परविरुद्धानां सत्त्वादीनां विधौ समुच्चयविरोधवत्, तद्विरहसमुच्चयस्यापि विरोधादेवानुपपत्तेः, एकाभिन्नस्य तद्वदेवेतराभेदायोगाच्च। अन्यथा तस्यापि प्रसंगान्नानेकरूपत्वसिद्धिः।

। अनेकान्तवादनिरासः ।

यच्चेदमनुमानं विमतमनेकान्तम्, प्रमेयत्वात्, नरसिंहवदिति, तदप्यध्यक्षबोधबाधविधुरीकृतकन्धरतया न प्रामाण्य-धुरमधिगच्छति। तथा हि-स्तम्भोऽयं[4] कुम्भोऽयमित्येकाकारमेव भावानां स्वभावमुपलभामहे। न च कुम्भाद्याकारेण भेदो मृदाद्याकारेण चाभेद इत्यनेकान्तिकता, [5]अनुवृत्तव्यावृत्तयोर्विरुद्धयोरेकत्वायोगात्। जीवादेश्च

(1) ह्रस्वत्ववर्णयोश्च P. (2) P. स्वप्रत्यय (3) P. संबन्धा (4) p. स्तंभोऽयं P. (5) अनुवृत्ति P.

सप्तसंख्यायां व्यभिचारः, इतरथा न्यूनातिरेकप्रसंगात्। किञ्च दिगम्बरैर्यद्भुज्यते, तत्किं भोज्यमेवोताभोज्यमेवोताभोज्यमपि? प्रथमे तत्रैवानेकान्तिकत्वम्, चरमे[1] नियमेन भुज्यमानत्वं व्याहन्येत, विष्ठादिवदुपेक्षणीयत्वात्।

न चोपेक्षणीयत्वमप्यभोज्यत्वस्याप्येकान्ततोऽभावादिति अप्रवृत्तिनिवृत्ति जगदापद्येत।

। जीवस्य मध्यमपरिमाणत्वभङ्गः ।

यश्च जीवपदार्थो नित्यसिद्धोऽनादिः मध्यमपरिमाणो वर्णितस्तत्र मध्यमपरिमाणत्वे घटादिवदनित्यत्वादनात्म[2]त्वादिप्रसंगः। कर्मविपाकवशाच्च नागेन्द्रदेहगतो देही मशकशरीरं सर्पन् न तत्र संमीयेत। अवयवोपचयापचयाभ्युपगमे च चर्मवदनित्यत्वप्रसंगः। अजीवशब्देन पुद्गलास्तिकायादिरुच्यते, सोऽपि च संघातस्य भेदादिविकल्पासहत्वात् दुर्निरूप एवेत्यलम्।

। चार्वाकपक्षप्रतिक्षेपः ।

यदपि चार्वाको व्यचीचरत्[3]—पृथिव्यादीनि चत्वार्येव तत्वानि देह एव चात्मा, प्रत्यक्षमेव प्रमाणम्, नानुमानादिरिति। तत्र तावदनुमानादेरप्रामाण्यभिधानं न शोभते, प्रत्यक्षेऽन्तर्भावाभ्युपगमात्। नो खल्वमानं मानेऽन्तर्बिभावयिषितम्, कथञ्च मानान्तरानङ्गीकारेऽन्तर्भावो वा परं प्रति प्रतिपाद्येत। न हि मानान्तराणां प्रत्यक्षेऽन्तर्भाव इत्ययमर्थोऽस्माकं प्रत्यक्षगोचरः। न च वाङमात्रेण विप्रतिपत्तिनिरासः।

। मानान्तराणां प्रत्यक्षान्तर्भावनिरासः ।

किञ्च कोऽयमन्तर्भावः प्रत्यक्षे ? किं प्रत्यक्षत्वापादनम्, किं वा प्रामाण्यम्, किं वा विलक्षणसामग्र्यनिरूपणम्, किं वा प्रमेयानिरूपणम्, उत स्वातन्त्र्यप्रतिषेध इति। नाद्यः, तर्कसहस्रेण वस्तुस्वभाववैपरीत्यासंभवात्। परोक्षत्वञ्च प्रत्यक्षवदनुभवसिद्धं नापलापमर्हति; तदपलापे प्रत्यक्षस्याप्यपलापापातात् प्रत्यक्षेऽन्तर्भाव इति व्यर्थं वचः स्यात्। यदि प्रत्यक्षवत् प्रामाण्यं तत्रान्तर्भाव इष्ट एवास्माकम्। न तृतीयः अन्तर्भावोक्त्यैव विलक्षणसामग्र्यङ्गीकारात्। न हि तावन्मात्रसामग्रीकस्यैव तत्रान्तर्भावोपपादनं कश्चिच्चिकीर्षत्यमूढः। चतुर्थोऽप्यर्थशून्यः, प्रत्यक्षस्येव प्रसिद्धेनैवार्थेनार्थवत्त्वात्। सामान्यविशेषविकल्पासहत्वेन प्रमेयानिरूपणं तु प्रत्यक्षेऽपि समानम्। तथाहि-न तावत्प्रथमप्रत्यक्षस्य सामान्यमालम्बनम्, वस्त्वन्तरानुगमानुसन्धानापेक्षत्वात्सामान्यप्रत्ययस्य।

नापि विशेषः, व्यावृत्तो हि विशेष उच्यते। न च सर्वपरिचयमन्तरेण सर्वतो

(1) P. कारणे (2) P. नात्मादि 3. व्यचीकरत्

व्यावृत्ति कश्चिन्निश्चिकीर्षति। ततः सर्वज्ञस्यैव विशेषः प्रकाशेत। व्यावृत्तश्च प्रतियोगी प्रतियोगितन्त्रा च व्यावृत्तिरिति दुरुत्तरं परस्पराश्रयम्। तस्माद्व्यावहारिकेणैवालम्बनेन यथा प्रत्यक्षं सालम्बनं तथा मानान्तरमपीति पञ्चमोऽप्यभिमतः। न ह्यनुमानादिशब्दाभिधेयं ज्ञानं स्वतन्त्रं ब्रूमः। तस्मादन्तर्भावोऽप्यविचारितरमणीय एव। न च वयं कस्यचिदन्तर्भावं ब्रूमः प्रसिद्धविभागाङ्गीकारात्। तथा हि—संप्रयोगात् ज्ञानं प्रत्यक्षम्, लिङ्गादनुमानम्, शब्दाच्छाब्दं[1]सदृशादुपमानमनुपपत्त्याऽर्थापत्तिरनुपलब्धेरभाव इति प्रसिद्धिः।

। देहस्यानात्मत्वसाधनम् ।

सति चैवं देहस्यानात्मत्वे मानान्तरमवतरीतरीति। देहो नात्मा भौतिकत्वात्, रूपादिमत्त्वाद्वा घटवत्। देहःस्वव्यतिरिक्तेनैव दृश्यो दृश्यत्वात् घटवत्। न च मनुष्योऽहमिति प्रत्यक्षबाधः, अभ्यासादपि कलधौतबोधवदुपपत्तेः। न च बाधवैधुर्यात् प्रामाण्यं मदीयं शरीरमिति व्यतिरेकप्रत्ययेन बाधात्। न च व्यतिरेक एवाऽध्यस्तो द्वितीयचन्द्राकारवत्, द्वितीयमनुष्याकारोपलम्भापातात्।[2] स्वप्ने च मनुष्याकारसंसर्गविधुराहंकाराविष्काराच्चैतन्यधर्मविशिष्टतया च देहस्याहंप्रत्ययगोरचत्वे परशरीरेऽपि शुक्लो घट इतिवन्मनुष्योऽहमिति सामानाधिकरण्यप्रसंगात्। आत्मीयत्वाभावे च व्यतिरिक्तात्माङ्गीकारप्रसंगात्। देहस्यैव चात्मत्वे निर्निमित्तत्वात्स्वप्नाद्यनुपपत्तिः, देहस्वभावादेव तदुपपत्तौ सदातनत्वप्रसङ्गः। स्वो हि भावः स्वभावः स्वरूपमिति यावत्; नह्यागमापायि स्वरूपं भवति। स्वभाववादे च शास्त्रक्रियाऽपि व्यर्था, जीवनमपि च दुर्लभम्, आगामि[3]भोजनादौ प्रयत्नकारणाभावात्। तस्मादलं लोकायतविलापविलोकनेन।

। कर्ममीमांसकमतनिरासः ।

कर्ममीमांसकाश्च वेदैकसमधिगम्योऽग्निहोत्रादिरेव धर्मः, न तु बुद्धादिशास्त्रगम्यश्चैत्यवन्दनादिरिति मीमांसांचक्रुः तथा हि——"अथातो धर्मजिज्ञासा" इत्यध्ययनविधिप्रयुक्तं धर्मविचारं प्रतिज्ञाय, किं लक्षणो धर्मः, किं प्रमाणकश्चेत्याकाङ्क्षायां——

"चोदनालक्षणोऽर्थो धर्मः" इति श्रुत्यर्थाभ्यां तदुभयमसूसुचत्। अनन्तरञ्च "तस्य निमित्तपरीष्टिः" इत्यारभ्य धर्मज्ञाने चोदनाया एव निमित्तत्वनिर्धारणा धर्मस्य प्रमाणान्तरायोग्यत्वप्रकटनाय। भाट्टमते प्रत्यक्षादीनि षट्प्रमाणानि। प्राभाकराश्च पञ्च न्यरूपयन्।

। द्वितीयाद्यध्यायानां विषयाः ।

द्वितीये चाध्याये शब्दान्तरमभ्यासः संख्या गुणः प्रक्रिया नामधेयमिति कर्मणो

(1) P. सादृश्यात् (2) P. पलंभात् (3) P. omits आगामि.

भेदकानि षड् प्रमाणानि प्रतिजज्ञिरे। तृतीये च श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याख्यानि षट्प्रमाणानि शेषशेषिभावे समर्थयामासुः। अनन्तरं च क्रत्वर्थपुरुषार्थानुष्ठेयपरिमाणं चतुर्थे वर्णयांञ्चक्रुः। प्राभाकराश्चोपादानाख्यं मानान्तरं निरूपयांबभूवुः। श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिलक्षणानि चानुष्ठानक्रमे प्रमाणानि पञ्चमे व्याचचक्षिरे। यथा "अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति" इत्यत्र क्त्वाश्रुत्या क्रमसिद्धिः। अग्निहोत्रं जुहोति यवागूं पचतीत्यत्रानुपपत्त्या। प्रयाजेषु पाठक्रमात्। सवनीयस्थाने पश्वालम्भश्रवणात्सवनदैवत्यस्य पूर्वमालम्भो मुख्यक्रमेणैव तदङ्गानुष्ठानम्। छेदनप्रवृत्तिक्रमेणैव यूपेषु तक्षणादिः। षष्ठे चार्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तोऽधिकारी साङ्गक्रमविशिष्टधर्मानुष्ठाने प्रतिष्ठितः। तदेवं पूर्वषट्केन प्रकृतिसम्बद्धं विचारं चक्रुः। उत्तरषट्केण च विकृतिसम्बद्धम्; तत्रापि सप्तमे प्रकृतिवद्विकृतिः कर्तव्येति सामान्यातिदेशो निरूपितः। अष्टमे च विशेषातिदेशः, यथैकदेवतत्वसाम्येनाग्नेयगतो विध्यन्तः "सौर्यं चरुं निर्वपेत्" इति विहिते यागे। नवमे च प्रकृतिगतानाञ्चाङ्गानां मन्त्रादीनां विकृतावतिदेशेन प्राप्तानां विकृतौ द्रव्यदेवताभेदे सत्यूहो दर्शितः। यथा "अग्नये जुष्टं निर्वपामि" इति मन्त्रे "सूर्याय जुष्टम्" इति पदप्रक्षेपः। प्राकृतानाञ्चाङ्गानां विकृतिगतविशेषोपदेशेन दशमे बाधोऽध्यवसितः, कुशमयबर्हिषामिव शरमयबर्हिर्भिः। सकृदनुष्ठितं बहूनामुपकारकं तन्त्रं नामैकादशे दर्शितम्। यथा सकृदनुष्ठितं प्रयाजाद्याग्नेयादीनामुपकारकम्।

द्वादशे तु परोद्देशप्रयुक्तानामङ्गानां प्रसङ्गात्परत्राप्युपकारकत्वं प्रसंगो गदितः। तदेवं द्वादशलक्षण्यां मीमांसायां दृष्टफलमदृष्टफलमनियतफलञ्च धर्माख्यं कर्म अधर्माख्यञ्च परिहाराय व्यचीचरन्।

। मिथ्यात्वेपि प्रपञ्चस्य मीमांसकमतोपपत्तिः ।

तत्रोच्यते; यद्यविचारितसिद्धां लोकप्रसिद्धिमाश्रित्यासौ विचारः प्रवरीवर्ति, तर्हि प्रवर्तताम् का नो हानिः। नो श्रलु तैमिरिकदृष्टं चन्द्रस्य सद्वितीयत्वं तदेकत्वव्याघातकरम्। यदि धर्मस्य परमार्थत्वाभिप्रायेणायं विचारस्तर्हि विचारणीयम्, किं प्रमितो धर्मो जिज्ञास्यःउताप्रमित इति? तत्राद्ये वैयर्थ्यं विचारस्य; चरमे त्वशक्यत्वमसिद्धोद्देशेन विचारविधानानुपपत्तेः। न च विचारोऽध्ययनविधिप्रयोज्यः, तदनुपयोगित्वादग्नहोत्रवत्। नचार्थावबोधफलोऽध्ययनविधिरश्रुतत्वात्। न च कल्प्यः, उपनीतस्य नित्याधिकारात्। स्वाध्यायस्य भाव्यताभिधायितव्यश्रुतिविरोधे च नार्थावबोधस्य भाव्यताकल्पनम्। तस्मान्न फलपर्यन्तत्वायावघातावृत्तिवदध्ययनविधेर्विचारप्रयोजकत्वमिति।

। चोदनासूत्रार्थनिरासः ।

द्वितीयसूत्रार्थोऽपि परस्पराश्रयग्रस्तः। चोदनैव धर्मे प्रमाणमित्यवधारणे सिद्धे

चोदनालक्षण एवार्थो धर्मः, न चैत्यवन्दनादिरिति सिद्ध्यति, सिद्धे च तस्मिंश्चोदनैव धर्मे प्रमाणमित्यवधारणसिद्धिरिति। न ह्यतीन्द्रियो धर्म इति चोदनां विनाऽन्यतस्ते सिद्धम्। यच्च षट्प्रमाणनिरूपणं तत्र प्रत्यक्षानुमानयोरनिर्वाच्यत्वमवोचाम। वेदस्य तु प्रसिद्धस्यैव बोधकत्वं न तु स्वरूपसत्यस्य विकल्पासहत्वात्। तथा हि-किं यौगिकोऽयं वेदशब्दो वेदयति इति किं वा रूढः। प्रथमे चक्षुरादेरपि वेदत्वप्रसङ्गः। चरमे किं वर्णमात्रे रूढः किं वा क्रमविशिष्टेषु? नाद्यः, ककारादिदर्शनेऽपि वेदबुद्ध्यभावात् नापि द्वितीयः, क्रमानिरूपणात्। न तावद्वर्णानां देशक्रमः कालक्रमो वा संगच्छते विभुत्वात्। नापि वस्तुस्वभावप्रयुक्त एव क्रमः, कपिः पिक इत्येकस्य युगपत्पूर्वापरीभावविरोधात्। परकीयोच्चारणोपलब्ध्योश्च परस्याप्रत्यक्षत्वान्न तत्क्रमविशिष्टानां प्रत्यक्षता स्यात्।

अनिर्वाच्यक्रमारोपे च कल्पितानामेव बोधकता, कल्पितक्रमविशिष्टानां कल्पितत्वादिति।

। अर्थापत्तिनिरासः ।

यच्चानुपपद्यमानदर्शनादुपपादके बुद्धिरर्थापत्तिरिति, तत्र किं स्वरूपेणानुपपद्यमानतादर्शनम्, किं वोपपादकेन विना? नाद्यः, स्फोटादौ दृष्टे स्वरूपानुपपत्त्यदर्शनात्। न द्वितीयः, प्रमेयस्यापि सामग्र्यनुप्रवेशित्वेन प्रागेव दर्शनप्रसङ्गात्। यच्च संविद्द्वयविरोध्यनुपपद्यमानता नामेति, तदसङ्गतम्। संविदोरेकविषयत्वे भिन्नविषयत्वे च विरोधासंभवस्यैवोक्तत्वादित्यर्थापेत्तिरप्यविचारितरमणीयैव व्यवहाराङ्गम्।

। उपमानानुपलब्ध्योर्निरासः ।

यच्च सदृशदर्शनात्सदृशान्तरे बुद्धिरुपमानमिति, तदप्यव्यापकम्, तेनेदं विसदृशमित्यस्याप्युपमानत्वात्। यच्च योग्यानुपलम्भादभावज्ञानम्, तदपि दुर्निरूपम्, तथा हि——किमुपलब्धादनुपलम्भादभावज्ञानं किं वाऽनुपलब्धात्? प्रथमेऽनवस्था, चरमे प्रातर्गजाभावप्रतिपादनं कालान्तरे स्यात्। नहि तदा धर्मिग्राहकप्रमाणप्रतियोगिस्मरणसद्रीचीनोपलब्धोऽनुपलम्भोऽभावज्ञाने कारणभावं भजते, किन्त्वनुसंधीयमान एव। किञ्च सिद्धेऽन्योन्याभावज्ञाने धर्मिप्रतियोगिविभागसिद्धिः। तत्सिद्धौ च तदवच्छिन्नाभावसिद्धिरिति परस्पराश्रयादनिर्वाच्य एवाभावो व्यवहाराङ्गम्। यस्तु प्रभाकरो व्यवहाराङ्गमप्यभावं नोररीकरोति, तस्यानुभवविरोधः, कुम्भोऽस्तीतिवत् कुम्भो नास्तीत्यनुभवात्। ननु यादृशं भूतलं तव कुम्भाभावाश्रयस्तादृशमेवास्माकं कुम्भोनास्तीति प्रत्ययालम्बनं भविष्यतीति नास्माकमभावविरोधिना भावेनाक्रान्ते भूतले तदभावो ज्ञायते। न, तव त्वभावविरोधित्वाभावाद्भावस्य भूतलस्वरूपं चेदालम्बनम्, तर्हि सघटेऽपि भूतले स्यादेव नास्तीति प्रत्ययः। प्रसिद्धश्च भावाभावयोः सहानवस्थानलक्षणो

विरोधः। किञ्चाभावानभ्युपगमे न तदपह्नवोऽपि, न ह्यभावो नास्तीत्यनया गिरा भावान्तराङ्गीकरणे व्यवहाराङ्गभूतोऽभावोऽपह्नुतो भवेत्। तदलमनेन फल्गुकोलाहलेन।

। द्वितीयाध्यायार्थस्य तात्त्विकत्वनिरासः ।

यच्च द्वितीयेऽध्याये भेदसाधकं प्रमाणषट्कमध्यगीष्ट, तदपि किं सिद्धस्य भेदस्य साधकम्, उताऽसिद्धस्य, प्रथमे नैष्फल्यमनवस्था च। द्वितीये त्वशक्यं तत्साधनमाकाशारोहणवत्। तत्र भिन्नभावार्थविषयः शब्दः शब्दान्तरम्, यथा यजति जुहोति ददातीति। तत्र न धातुभेदमात्राद्भावार्थभेदः, धातूनामेकार्थत्वस्यापि दर्शनात्। न च विलक्षणधातुभेदात्, अन्योन्याश्रयात्। वषट्कारप्रदानं उत्थितकर्म[1] यजत्यर्थः। स्वाहाकारप्रदानमुपविष्टकर्म जुहोत्यर्थः। स्वस्वत्वनिवृत्त्या परस्वत्त्वापादनं ददात्यर्थ इति चेत्, तर्हि लक्षणत एव भेदसिद्धेर्न शब्दान्तरं मानम्। यद्यावृत्तिरभ्यासस्ततः समिधो यजतीत्यादौ भेदस्तर्हि दध्ना जुहोतीत्यादौ जुहोत्यावृत्तभेदप्रसङ्गः। अनन्यथासिद्धोऽभ्यासो भेदकश्चेत्तर्हि यतोऽन्यथात्वं तत्सिद्धयपेक्षायामन्योन्याश्रयप्रसङ्गः।

रूपसंख्या रूपिभेदे मानं यथा सप्तदश प्राजापत्यान् पशूनालभत इति तद्धितश्रुतिप्रापितद्रव्यदेवतासम्बन्धकर्मरूपे संख्या निविशमाना कर्मणो भेदिका। तत्र विशिष्टसम्बन्धस्य तत्त्वान्तरत्वेन सप्तदशसंख्याश्रया[2]त्मकत्वेऽप्येकैकस्य न सप्तदशकत्वमन्यसंख्ययापि चान्यभेदेऽतिप्रसङ्गः। अप्रकृतदेवतासम्बन्धि द्रव्यं कर्म्मणो गुणः, ततः कर्मणो भेदो यथा "तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इत्यत्र। तत्र गुणभेदाद्गुणिभेदो न लौकिकः। प्रक्रमभेदात्कर्मभेदो यथा कुण्डपायिनामयने "द्वादशभिरुपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति" इति। तत्र प्रकरणान्तरे पाठमात्रेण कर्मभेदे "सर्वस्मै वै कामाय दर्शपूर्णमासा" वित्यादावपि भेदप्रसंगः। जुहोतितन्त्राग्निहोत्रश्रुत्या च प्राकृताग्निहोत्रस्य बुद्धौ स्थितायां तत्रैवोपसदादिगुणविधिशङ्कायां कुतः प्रक्रियान्यत्वेन कर्मान्यत्वम्।

अपूर्वसंज्ञा नामधेयं, संज्ञिभेदे मानम्, "अथैष ज्योतिः अथैष विश्वज्योतिः अथैष सर्वज्योति[2]रेतेन सहस्रदक्षिणेन यजेते"त्यत्र। तत्र प्रकृतपरामर्शिनैतच्छब्देन सामाधिकरण्यात्संज्ञान्तरस्यापि प्रकृतवृत्ति[3]संभवे कुतस्तन्मात्रेणान्यत्वम्।

अथशब्दात्प्रकृतविच्छेदे तत एवान्यत्वम्।

। तृतीयाध्यायार्थभङ्गः ।

तार्तीयोऽपि शेषशेषिभावोऽन्याधीनसिद्धित्वान्न वस्तु। यच्च श्रुतिः पदान्तरनिरपेक्षः शब्दः, तद्विनियोगे मानम्। यथा प्रकरणाम्ना[4]नात्सामान्यतेऽपूर्वत्वे सिद्धे "कदाचन

(1) P. स्थितकर्म. (2) संख्यात्मकत्वे P. (3) P. कल्पि (4) P. म्नातात्

स्तरीरसि नेन्द्र" इत्यस्या ऋचो गार्हपत्योपस्थाने विनियोगः "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इति श्रुत्या। तत्र द्वितीयाश्रुतिः कर्मतामात्रमाचष्टे, गार्हपत्योपस्थानस्य शेषितायां पदान्तरापेक्षा अवश्यंभाविनी।

श्रुतसामर्थ्यं लिङ्गम्। यथा "बर्हिर्देवसदनं दामी" त्यस्या ऋचो बर्हिर्लवने विनियोगः, तत्प्रकाशनसामर्थ्यात्। तत्र दाप् लवन इति धात्वर्थमात्रानुसंधानान्न विशेषे विनियोग; अनेकपदसामर्थ्यानुसंधाने तु वाक्यत्वप्रसङ्गः।

अनेकपदसामर्थ्यं वाक्यम्। यथा—"इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते" इत्यत्र, अत्र मन्त्रपदसामर्थ्याद्गर्दभरशनादानेऽपि विनियोगप्राप्तौ ब्राह्मणपदसामर्थ्यादश्व-रशनादाने मन्त्रविनियोगः। तत्र सामर्थ्यं वाचकशक्तिश्चेन्नागमाद्भेदः। आक्षेपकत्वं च न पदधर्मः।

वाक्यद्वयसामर्थ्यं प्रकरणम्। यथा साधिकारवाक्यस्येतिकर्तव्यताकाङ्क्षायां निरधिकारवाक्यस्य चाधिकाराकाङ्क्षायां प्रयाजादीनां दर्शादिषु शेषत्वम्। तत्राप्याकाङ्क्षायाः पुरुषधर्मत्वान्न वाक्यधर्मत्वम्। फलवत्त्वेन[1] शेषित्वं च नित्ये गुरुमते व्यभिचरति।

क्रमनिर्दिष्टानां क्रमनिर्दिष्टैर्यथाक्रमं सम्बन्धःस्थानम्। यथा "ऐन्द्राग्नमेकादशकपालम्" इत्याद्या इष्टयः पठिताः। "इन्द्राग्नी रोचना दिवः" इत्यादिमन्त्राश्च। तत्र प्रथमपठितेष्टौ प्रथमपठितमन्त्रस्य शेषत्वं, लोके योग्यतावशेन व्युत्क्रमेणापि सम्बन्धदर्शनान्न तावन्मात्रं सम्बन्धविशेषे मानम्।

संज्ञासाम्यं समाख्या। ततश्चाध्वर्यवसंज्ञिकानां मन्त्राणामाध्वर्यवसंज्ञिके कर्मणि विनियोगः। तत्रापि पौरुषेयसंज्ञाया नानादौ वेदे सम्बन्धविशेषनियामकत्वम्। योग्यतानुसंधाने तु न समाख्यामात्रं मानमिति स्थितम्।

। शेषशेषिभावादिभङ्गः ।

यच्च तृतीयाध्याये शेषशेषिभावनिरूपणं तदपि न वस्तु। शेषशेषिणोः परस्पराश्रयसिद्धिकत्वात्। चातुर्थिकञ्चोपादानं नियोगापाकरणादेवापाकारि, नियोगाक्षेपो ह्युपादानमिति परिभाषन्ते। यश्च पञ्चमे क्रमो वर्णितः, स न तावदेकैकधर्मः। एकैकस्मिंस्तद्बुध्यदर्शनात्। अनेकधर्मश्चेत् संयोगवदाश्रयसहभावात् क्रमत्वव्याघातः क्षणिकानां कर्मणां न सहभावोऽपि संभवी। यच्च षष्ठेऽधिकारिवर्णनं तदपि दुर्निरूपम्। यस्य हि ब्राह्मणादिजातिविशिष्टस्याधिकारो न तस्य परलोके फलभोक्तृ-

त्वम्। इहैव विशेषणापगमेन विशिष्टविनाशात्, स्वरूपं तु निरवयवत्वात्सर्वगतत्वान्नभोवन्निष्क्रियत्वान्नाधिकारमर्हति। यदपि पूर्वषट्केन प्रकृतिं निरूप्योत्तरषट्केन विकृतिनिरूपणं तदपि प्रकृतिविकृत्योःपरस्पराधीननिरूपणत्वाद्दुर्निरूपम्॥

। देवताविग्रहसद्भावसाधनम् ।

यच्च नवमे विग्रहवती देवता नास्तीति प्रत्यतिष्ठिपत्, तदप्यपेशलम्। यतो "जगृभ्माते दक्षिणमिन्द्र हस्तम्" "आदित्यः पुरुषो भूत्वा कुन्तीमुपजगाम ह" इत्यादिमन्त्रार्थवादेतिहासपुराणलौकिकचित्रकारादिप्रसिद्धिभ्यो देवतानां विग्रहवत्त्वम् कारुण्यं फलदातृत्वञ्च, चर्मचक्षुषा चादृश्यत्वम् मधुकरवत्सारग्राहकत्वञ्चावगम्यते। ननु मन्त्रादेस्तत्र न प्रामाण्यम्, विधिशेषत्वात्। न, विधिशेषत्वेऽप्याज्यावेक्षणस्य प्रयाजादिवाक्यानाञ्च प्रामाण्यदर्शनात्। किञ्च, विधिशेषत्वमप्यर्थवादपदानां स्वार्थसंसर्गमवबोध्यैव, कैमर्थ्यवशेन, न तु साक्षाद्विध्यन्वयः संभवति। न हि भवति "वायुरालभेत" "क्षेपिष्ठा वा देवता आलभेतेति"। किन्तु यस्मात्क्षेपिष्ठत्वादिगुणविशिष्टा वायुदेवता तस्माद्वायुदैवत्यं पशुमालभेतेत्यन्वयः। सिद्धार्थे व्युत्पत्तिञ्च प्रत्यपीपदम्। तस्मादसति विरोधे मन्त्रार्थवादेतिहासपुराणानां यथाश्रुतेऽर्थे प्रामाण्यात्तद्बलाच्च स्वर्गापवर्गदेवतादीनामवश्याश्रयणीयत्वादलं कर्ममीमांसायां तत्वांशपरीक्षणेन छान्दसमीमांसकविद्वेषकरेण।

। प्रत्यक्षस्य अद्वैतबाधकत्वनिरासः ।

यदि शिष्येणाद्वैततत्त्वबुभुत्सुना तद्विपरीतं द्वैतमसंभावनादिपरिहाराय निरूपयिष्यते; तर्हि तेन श्रद्धावत्त्वादिमता निरूपणीयम्। नहि तदन्तरेण वर्षशतेनापि तत्त्वमवगन्तुं शक्यते।

तदुक्तम्,

"श्रद्धावाल्लँभते ज्ञानं तत्परः संयतेन्द्रियः।
"अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति॥
"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।"

"शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्ये-" दिति "अमानित्वादिनिष्ठो यो यश्चाद्वेष्टादिसाधनः। ज्ञानमुत्पद्यते तस्य न बहिर्मुखचेतस" इति च। सत्यमेवं मयाऽपि तत्त्वबुभुत्सयैव पृच्छ्यते — प्रत्यक्षादिना सत्ये द्वैते प्रमीयमाणे कथमद्वैतं तत्त्वमिति। तत्रोच्यते — प्रत्यक्षस्य तावद्वर्तमानसत्वग्राहिणो नात्यन्ताबाध्यत्वलक्षणसत्यत्वग्रहणे व्यापारः संभवति। विमतः प्रपञ्चोऽत्यन्ताबाध्यः, विसंवादिव्यवहारागोचरत्वात्, आत्मवदित्यनुमानमप्यमानं चन्द्रप्रादेशिकत्वादौ व्यभिचारात्।

यदि तत्र कस्यचिद्विसंवादोऽस्तीत्यभिदध्यात्, तर्हीहापि विद्यत एव। "नेह नानास्ति किञ्चन" इति श्रुतिपरायणानां विसंवाद इत्यसिद्धिरेव।

। प्रपञ्चसत्यत्वानुमानभङ्गः ।

यच्च **महाविद्यानुमानम्**, विमतः सत्यत्वातिरिक्तैतन्निष्ठधर्मान्यधर्मवान्, प्रमेत्वात्पटवदिति, तदपि प्रकरणसमत्वान्न सत्यत्वनिश्चायकम्। शक्यते हि प्रयोक्तुं—विमतो मिथ्यात्वातिरिक्तैतन्निष्ठधर्मान्यधर्मवान् प्रमेयत्वात्पटवदिति, किञ्च सत्यत्वातिरिक्तो य एतन्निष्ठो धर्मस्तस्य किं मिथ्याशब्दार्थत्वमङ्गीकरोषि न वा? प्रथमे न विमतसत्यतासिद्धिः। चरमे, न ततोऽन्यो धर्मः सत्यतालक्षण एव सिद्ध्यति, प्रतियोगिमिथ्यात्वाभावात्, नरविषाणविदीर्णत्वादि किं न स्यात्। विपक्षबाधकानुकूलतर्काभावादप्रयोजकश्च हेतुः। ननु सर्वमेतत्बाधकमबाध्यत्वातिरिक्तैतन्निष्ठधर्मान्यधर्मवत्, प्रमेयत्वात्पटवत्। नानुपलब्धिबाधितत्वात्। धर्मान्तरस्यातीन्द्रियस्य सद्भावेऽपि प्रत्यक्षदृष्टबाधकत्वस्यापनेतुमशक्यत्वान्न मे किञ्चन हीयते।

ननु यावज्जीवं त्वयोच्यमानं न मदीयानुमानस्य दूषणम्, प्रमेयत्वात्पटवत्। तर्हि, यावज्जीवं त्वयोच्यमानं त्वदीयानुमानस्य भूषणमपि न भवति, प्रमेयत्वात्पटवत्। किमेतन्मदीयानुमानस्य दूषणमुद्भाव्यते न वा? आद्ये पक्षे निक्षिप्यताम्। द्वितीये न किञ्चन हीयते। हीयत एव भूषणाभावे त्वदीयवचनस्यानुमानत्वस्यैवाभावप्रसंगात्, न हि दोषाभावमात्रेणैव चानुमानम्। किन्त्वनुमानाङ्गभूषितम्। अपरथा सर्वस्य सर्वार्थसिद्धिप्रसंगात्, सर्वत्र संशयप्रसङ्गाद्वा न तत्त्वनिश्चयः कस्यापि स्यात्। तस्मान्महामोहव्यञ्जिकां महाविद्यामुपेक्ष्यैव विवदितव्यमित्यलम्।

आगमस्तु "मृत्तिकेत्येव सत्यम्," इत्यादिः [1]व्यावहारिकसत्यतानुवादेन विकारानृतत्वपरः, इतरथा दार्ष्टान्तिकाननुगुणत्वप्रसंगात्। "प्राणा वै सत्य" मित्यादेरप्येषैव गतिः। अन्यथा सत्यस्य सत्यमित्यनेन विरोधात्।

यच्चार्थापत्तिः पुण्यपापयोः स्वर्गनरकपर्यन्ततानुपपत्तिरिति, सापि ब्रह्मात्मैकत्वज्ञानात् प्राग् द्वैतस्यार्थक्रियाक्षमत्वाङ्गीकारादन्यथाप्युपपन्ना। तस्मात् प्रत्यक्षादिना द्वैतसत्यत्वासिद्धेर्न शिष्यस्याप्यद्वैते[2] काचिदनुपपत्तिः परिस्फुरति।

। प्रपञ्चमिथ्यात्वे अनुमानानि ।

वर्णितञ्चाचार्यवर्यैः प्रपञ्चमिथ्यात्वे मानं—विमतं मिथ्या दृश्यत्वात्कार्यत्वाज्जडत्वाद्वा संप्रतिपन्नवदिति। नन्वात्मन्यनैकान्तिकमाद्यं हेतुद्वयम्। न, जडत्वं ह्यसंविद्रूपत्वम्, श्रुतिश्चात्मनः संविद्रूपत्वमाह "विज्ञानमानन्दं ब्रह्मे"ति। दृश्यत्वं

(1) P. मृत्तिकासत्यतानुवादेन विकरासत्यतानुवादेन। (2) P. किंचिद

तु स्वव्यवहारे स्वातिरेकिस्वदर्शनापेक्षानियतिः, तदपि निवारितं श्रुत्या "अत्रायं पुरुषः स्वयंज्योतिर्भवति" इत्याद्यया। नन्वियं श्रुतिः स्वात्मनो बाह्यसाधननिरपेक्षतया स्वग्राहकत्वमाह। न, श्रुतहान्यश्रुतकल्पनाप्रसंगात्। अयमिति हि विशेषणेन विशेष्य-ज्योतिष्ट्वमेव श्रूयते, न ग्राहकत्वम्। न चोपचारकल्पना युक्ता, मुख्यार्थबाधकादर्शनात्। नचाहंप्रत्ययग्राह्यत्वम्[1] विरोधात्, आत्मनस्तद्ग्राह्यत्वे प्रमाणाभावात्। छान्दोग्ये च "अथातोऽहङ्कारादेशः" इत्युपदिश्य "अथात आत्मादेशः" इत्यात्मनः पृथगुपदेशात्।

। आत्मस्वप्रकाशत्वसाधनम् ।

आत्मा परप्रकाश्यो वस्तुत्वात् घटवदित्यनुमानविरोध इति चेत्, न, अनुकूल-तर्काभावात्। अनित्यत्वादिसाधनेऽप्युक्तहेतुप्रवृत्तेरतिप्रसंगलक्षणप्रतिकूलतर्कपराहत-त्वाच्चाप्रयोजकत्वात्। आत्मा न स्वातिरेकिसंविदधीनसिद्धिः संवित्कर्मतामन्तरेणा-परोक्षत्वात्संवेदनवत्। संवेदनस्य च संवेदनान्तरानुपलम्भात्; उपलम्भे वा मनः संयुक्तात्मसमवायलक्षणसामग्र्यास्तुल्यत्वेनानन्तसंविदुपलम्भप्रसंगात्। संयोगान्तरे च क्रियाविभागादिव्यवधानेन वर्तमानसंविदस्फुरणप्रसंगात् सिद्धमेव स्वप्रकाशत्वम्। स्वप्र-काशत्वं चैतदेव, यत्स्वसंविन्नैरपेक्ष्येण स्फुरणम्। तस्मात्स्वप्रकाशत्वश्रुतेर्मुख्यार्थे बाधकादर्शनादात्मा स्वप्रकाश इति न तत्र मिथ्यात्वसाधनमनेकान्तम्।

। शुक्तिरूप्यस्य मिथ्यात्वनिरूपणम् ।

ननु तथापि साध्यविकलो दृष्टान्तः, शुक्तिरूप्यस्यापि सत्वात्। किं पुरोदेश एव तत्सत्, किं वा देशान्तरादौ किं वा बुद्धौ? नाद्यः, तदवभासस्याभ्रमत्वप्रसंगात्, बाधविरोधाच्च। न हि बाधेन[2] व्यवहारमात्रं पराणुद्यते, विरक्तस्य व्यवहारानुदये बाध-प्रसिद्ध्यसंभवप्रसंगात्। विवेकसमये च हेत्वभावे फलाभावसिद्धौ योग्यताप्रतिबन्ध-कल्पनायोगात्, भेदसिद्धेः प्राक् तादात्म्यनिषेधायोगात्, [3]वनस्पत्योरिव अनन्तरक्षणे तत्रैव दर्शनप्रसंगात्, दृष्टे गौरवाभावाच्च[4] रूप्यबाध एवास्थेयः। तत एव निषिद्ध-संसर्गवन्न देशान्तरादौ सत्त्वम्। तथात्वे चातिव्यवधानादक्षसन्निकर्षासंभवेनापरोक्ष्यं न स्यात्। दोषस्य च गुरुत्व[5]वदाश्रयपरतन्त्रस्य स्वातन्त्र्येण कार्यकरत्वायोगात्। अन्यथा दुष्टाक्षस्य सर्वज्ञतापातात्। संसर्गवदसत एव रूप्यस्य दोषादपि भानकल्पनस्य दृष्टानुसारित्वात्। लाघवतर्कसाहाय्याच्च न देशान्तरादौ सत्त्वं कल्पनीयम्। नापि बुद्धौ, पुरोदेशावच्छिन्नरूप्यसंविद्विरोधात्।

---

(1) विशेष्यमेव P.
(2) भेदेन–P.
(3) दृष्टिगोचरत्वाच्च: P.
(4) P. omits this
(5) P. चोरत्ववत्

। अख्यातिमतनिरासः ।

यस्त्वख्यातिवादी विवेकाग्रहात्प्रवृत्तिं ब्रुवाणः पुरोवर्त्तिनि रूप्यसंविदमेव निह्नुते तस्याविवेकादपि चेच्चेतनव्यवहारस्तर्हि श्रोतुः प्रवृत्त्या संसर्गज्ञानमनुमाय कथं तज्जनने शक्तिर्बालेनाधिगम्यते? अथानेकान्तपरिहारायाविसंवादिव्यवहारत्वादिति हेतुर्विशेष्यते, तदशक्यम्। प्रवृत्तिदर्शनमात्रेण तदविसंवादस्य निश्चेतुमशक्यत्वात्। यत्त्वनुमानं—विवादाध्यासिताः प्रत्यया यथार्थाः प्रत्ययत्वात्, संप्रतिपन्नप्रत्ययवदिति तदप्ययथार्थः प्रत्ययोऽस्तीत्यास्माकीनप्रत्ययेऽनैकान्तिकम्। तर्हि, यथार्थात्वाभावे शून्यख्यातिरेवास्त्विति न वाच्यम्। तथा सति प्रतीतिभेदप्रवृत्त्योरसंभवात्। तस्मात्परिशेषादनिर्वाच्यमेव रूप्यमविद्यान्वयव्यतिरेकानुविधायितया चाविद्याजम्, सम्यग्ज्ञानेन सविलासाविद्यानिवृत्तिश्च तद्बाध इति सिद्धम्।

। अविद्यायाः भावरूपत्वोपपत्तिः ।

नन्वविद्याया विद्याभावत्वान्न भ्रमोपादानत्वम्, न, सुषुप्तेऽभावमानं विनाऽविद्यायाः सिद्धत्वात्। कथमन्यथोत्थितोऽनुसंदध्यादेतावन्तं कालं न किञ्चिदज्ञासिषमिति। न चानुभूते स्मृतिनियमोऽस्ति येनास्मर्यमाणत्वात् सुषुप्ते ज्ञानाभावानुमानं स्यात्। तस्माद्भावाभावविलक्षणा नित्यानुभवसिद्धैवाविद्याऽभ्युपेया।

। अविद्याश्रयनिरूपणम् ।

ननु किमाश्रया अविद्या। चिद्रूपाश्रयेति ब्रूमः। तथाहि-एका तावदनादिरनिर्वचनीया महाभूतप्रकृतिर्माया, तस्यां चित्प्रतिबिम्ब ईश्वरः, तत्परिणामैरेव सर्वज्ञत्वादिमान्। बिम्बकल्पन्तु निर्विकल्पं ब्रह्म कैवल्यालम्बनम्। तस्या एव च मायायाः परिच्छिन्नानिर्वाच्यानन्तप्रदेशेष्वावरणविक्षेपशक्तिमत्सु अज्ञानाभिधानेषु प्रतिबिम्बितं तदेव चैतन्यमनन्तजीवव्यवहारास्पदं संबोभवीति। न च लोके प्रतिबिम्बस्य बिम्बपूर्वकता, स्वरूपैक्यात्, इष्टैव विशिष्टस्य तत्तन्त्रता च, न च एकस्य निरंशस्य कृत्स्नस्य युगपदनन्तप्रतिबिम्बभावो विरुध्येत इति वाच्यम्। "रूपं रूपं प्रतिरूपो बभूव" इत्यादिश्रुतेः, "एक एव तु भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" इत्यादिस्मृतेश्च। लौकिकानां तार्किकाणां च निरंशतया संमतस्यापि नभसो युगपदनेकपाथःसु प्रतिबिम्बभावानुभवात्। जीवानाञ्च प्रत्येकमविद्यानुविद्धत्वं श्रुतिस्मृत्यनुभवसिद्धं नापलापमर्हति। तथा च श्रुतिः—

"अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः। दन्द्रम्यमाणाः-परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः" "न तं विदाथ य इमा जजानान्यद्युष्मा-

कमन्तरं वभूव" इत्याद्या। स्मृतिरपि "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" इत्येवं-जातीयका।

। जीवन्मुक्तिविदेहमुक्त्योरुपपत्तिः ।

सति चैवं गुरुशिष्यमुक्तामुक्तादिविभागोऽपि संगच्छते। तथाहि—यस्य श्रवणमनननिदिध्यासनाभ्याससहकृतात्तत्त्वमस्यादिवाक्यात् तत्पदलक्ष्यबिम्बकल्प-निर्विकल्पब्रह्मात्मावगतिरुत्पद्यते, तस्य जन्मान्तरादिसकलसंसारकारणाविद्याकाम-कर्मपरिक्षयेऽपि आप्रारब्धभोगापरिक्षयं जीवन्मुक्तिस्तावदुपपद्यते। यथा ह्युदितेऽपि सवितर्यपवरकाश्रयस्तमोलेशो न संशमीति, अपवरकप्रतिबन्धात्, तथोदितोऽपि ब्रह्मज्ञानदिवाकरो न दन्दहीत्यविद्यालेशं प्रवृत्तफलकर्मप्रतिबन्धात्। तस्मिंस्तूपभोगेन प्रक्षीणे तत्क्षयकालिकः स एव ज्ञानानलो लेशमपि पोप्लुषीति; प्लुष्टे च तस्मिंस्तदुद्बुद्ध-लिङ्गकलेवरविलये प्रमातृत्वादिविलये च निर्मृष्टनिखिलदुःखानुषङ्गपरितःप्रद्योत-माननिरवद्यपरमानंदैकरसनिर्विकल्पबिम्बकल्पब्रह्मस्वरूपसंपत्तिर्विदेहमुक्तिरप्युपपद्यते। तथा च श्रुतिः "आचार्यवान् पुरुषो वेद; तस्य तावदेव चिरम्, यावन्न विमोक्ष्ये अथ संपत्स्ये" इति "विमुक्तश्च विमुच्यते" "ब्रह्मैव सन् ब्रह्माप्येति" "ब्रह्मविदाप्नोति परम्" "न तस्य प्राणा उत्क्रामन्ति" "अत्रैव समवलीयन्ते" "अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव इत्याद्या।

यस्त्वितरो मायाविवर्तो महाभूतप्रपञ्चः स विद्यमानोऽपि निरिन्द्रियेणेव रूपं नोपलभ्यते; "भूयश्चान्ते विश्वमायानिवृत्तिः" इत्यत्र मायाशब्देन मायैकदेशा-विद्याभिधानादागामिसकलसंसारकारणाविद्यानिवृत्तिः, न स्वरूपेण मायायाः सदेहत्वादिव्याघातात्।

। अखण्डार्थवादः ।

न चैवं सदद्वैतव्याघातः, अनिर्वाच्यविभागस्य तदविरोधित्वोपपादनात्, संवित्सुखात्मनश्चैकरसत्वात्। तथाहि—"विज्ञानमानन्दं ब्रह्म" इत्यादौ विज्ञानादिपदानां मुख्यसामानाधिकरण्येनाखण्डनिष्ठता प्रतीयते। व्यावर्त्यभेदाच्च न पदान्तराणां वैयर्थ्यम्। प्रवृत्तिनिमित्तभेदाच्च न पर्यायता।

विशिष्टवस्तुबोधने च मुख्यसामानाधिकरण्यानुपपत्तेर्विज्ञानत्वादिसामा-न्यानाञ्च स्वरूपे समारोपितत्वेन सम्बन्धासंभवादुपपद्यते लक्षणयैकस्यां स्वप्रकाशानंद-व्यक्तौ विज्ञानादिपदानां वृत्तिः। प्रयोगोऽपि—विज्ञानादिपदमखण्डनिष्ठं निषिद्धभेदे वस्तुनि वर्तमानत्वात्, केवलं भूतलमितिवत्। "कृत्स्नः प्रज्ञानघन एव" इति च श्रुतिः। वाक्यत्वादिति चानैकान्तिकं प्रकृष्टप्रकाश इत्यादौ, प्रश्नाननुरूपत्वप्रसंगात्। तदेतदेकरसं ब्रह्म जीवस्य स्वरूपत्वेन तत्त्वमस्यादिशास्त्रेण समर्थ्यत इत्यनपवादं स्थितम्।

। कर्मणां मोक्षसाधनत्वाभावनिरूपणम् ।

तत्र ज्ञानमात्रादेव च कैवल्यमित्यपि स्थितमेव। न ह्यविद्यात्मकबन्धनिवर्तने कर्मणां सामर्थ्यम्, ज्ञानस्य वा [1]सहकार्यपेक्षोपपद्यते। तथा च श्रुतिस्मृती– "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" "ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते" इति। यच्च "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति" इत्यादि, तदपीष्यमाणवेदनसाधनत्वमेव सत्वशुद्धिद्वारेण कर्मणामाचष्टे। यथाऽश्वेन ग्रामं जिगमिषति, इत्यत्राश्वस्येष्यमाणगमनसाधनतैव। प्राप्तौ तु तत्संयोगे गमनक्रियाया एव निरपेक्षसाधनत्वम्, तद्वत्। यच्च "तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म चोक्तं महामुने" इत्यापाततः समुच्चयपरमिव प्रतिभाति, तदपरिपक्वज्ञानस्य कर्म्मणश्च विद्यापरिपाके साहित्यपरम्, परिपक्वा तु विद्या कैवलैव कैवल्यायालम्।

। ज्ञानस्यैव मोक्षसाधनत्वम् ।

प्रयोगश्च-ब्रह्मसाक्षात्कारः स्वफले नेतिकर्तव्यतासापेक्षः, निरन्तरफलत्वात्, अबोधनिवृत्तिफलत्वाद्वा, शुक्तिसाक्षात्कारवत्। बन्धो वा केवलज्ञानापनोद्योऽज्ञानोपादानत्वात्, शुक्तिरूप्यवदिति। न च "विद्याञ्चाविद्याञ्च" इत्यादिश्रुतिविरोधः, वेदन-एव सहभावश्रवणात्, वाक्यशेषे फलभेदश्रवणाच्च। केवलविद्यानिन्दायाश्चापरिपक्वविद्याविषयत्वान्न तदनुत्पत्तिविरोधः। स्वफले ब्रह्मज्ञानमितिकर्तव्यतापेक्षम् करणत्वात्, कुठारवदित्यप्यबाधकम्, रजतबाधक[1]शुक्त्यादिज्ञानस्य स्वप्रमेयाज्ञाननिवर्तकस्येतिकर्तव्यतापेक्षानुपलम्भेनानैकान्तिकत्वात्। "हत्वाविद्यां धियैवेयात्तद्विष्णोः परमं पदम्" "ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते" इत्यादिश्रुतिस्मृतिविरोधाच्च। तस्मादज्ञानात्मकस्य संसारस्य ज्ञानादेव निवृत्तिः।

। सत्यबन्धस्य ज्ञानेन निवृत्त्यनुपपत्तिः ।

न च सत्यस्यापि ज्ञानेन निवृत्तिः शास्त्रप्रामाण्यादिति वाच्यम्, लौकिकव्युत्पत्तिबलेन शास्त्रस्यार्थप्रतिपत्तिः। अन्यथा अपूर्वकल्पनाभङ्गप्रसंगात्, लोके च नाज्ञानं विहाय ज्ञानं कस्यापि निवर्तकम्, न च तार्क्ष्यस्मरणमात्राद्विषोपशमः, अतिप्रसंगात्, किन्तु ध्यानमन्त्रप्रयोगादिक्रियायाः, न च विषयदोषदर्शनाद्रागविगमः, किन्तु वैराग्योदयः, स च रागविरुद्धश्चेतोवृत्तिविशेषः। नापि सेतुदर्शनादशुभोपशमः, किन्तु तत्र स्नानादिना। "ब्रह्महा विप्रमुच्येत तस्मिन्स्नात्वा महोदधौ" इत्यादिस्मृतेः, दर्शनं त्वर्थवादतयाऽनूद्यते "सेतुं दृष्ट्वा विमुच्येत ब्रह्महा ब्रह्महत्यया" इति, न विधीयते, प्रयत्नाविषयत्वात्, अप्रयतमानस्यानिष्टदर्शनात्। "आज्यमवेक्षते" इत्यादावक्षसन्निकर्षविधानमिवात्मा[2] द्रष्टव्य इत्यपि दर्शनानुवादेन श्रवणादिविधानं दृष्टव्यम्। दर्शनं न विध्यर्हम्, अक्रिया-

(1) P. अर्थबाधक (2) P. आत्मन्यपि

तत्साधनत्वात्, स्वर्गवत्, अक्रियात्वञ्च प्रकाशत्वात्, प्रदीपवत्; क्रियात्वे च संवित्साधनत्वाभावप्रसंगात्पुरुषेच्छाधीनत्वप्रसंगाद्वा, गतिवत्, अतो न विधिबलादपि ज्ञानात्सत्यबन्धध्वंसः।

न च ज्ञानात्स्वप्रागभावनिवृत्तिः; सति च प्रागभावे ज्ञानभावायोगात् अलब्धात्मकस्य घातकत्वानुपपत्तेः, निवृत्तेर्भावत्वेऽनवस्था, अभावत्वे च प्रागभावत्वप्रसंगः। सहभावित्वे च ज्ञानान्न स्यात्तन्निवृत्तिः। ज्ञानमज्ञानस्यैव निवर्तकमिति व्याप्तेः। बन्धस्याप्यज्ञानात्मकस्यैव निवृत्तिः केवलादेव ज्ञानादिति स्थितम्।

। अज्ञाननिवृत्तिविचारः ।

का पुनरज्ञाननिवृत्तिः? सदसत्सदसद्विलक्षणा अवच्छिन्नज्ञानापनोद्यविलक्षणेति ब्रूमः। तस्याश्च "नेह नानास्ति किञ्चन" इत्यविशेषनिषेधेन मिथ्यात्वावगमान्न तयाऽद्वैतव्याघातः। ध्वंसस्य निरुपादानतया नाविद्याक्षेपकत्वं शुक्तिरूप्यवदिति। न च 'विद्याञ्च,' इत्यादिश्रुतिविरोधः, वेदन एव सहभावश्रवणात्, वाक्यशेषे फलभेदश्रवणाच्च। केवलविद्यानिन्दायाश्चापरिपक्वविद्याविषयत्वान्न तदनुपपत्तिविरोधः। स्वफले ब्रह्मज्ञानमितिकर्तव्यताव्यपेक्षं करणत्वात्, कुठारवत्, इत्यप्यबाधकम्। शुक्त्यादिज्ञानस्य प्रमेयज्ञाननिरस्ताशेषदुःखनिरतिशयसुखप्राप्तेरितिकर्तव्यतानिरपेक्षत्वाच्च। स्वप्नगतध्वंसवत्परेषां सत्यस्य सत्यध्वंसवत् मिथ्याभूतस्यापि मिथ्याध्वंसोपपत्तिर्मिथ्यात्वात्। अविद्याकार्ययोरन्यत्वेऽविद्यासम्बन्धे व्यभिचारो ब्रह्मवदनिवृत्तिमत्त्वाच्च। तस्मादविद्यानिवृत्तौ निरस्ताशेषदुःखनिरतिशयसुखप्राप्तिर्मोक्ष इति सकलमनाकुलम्।

। उपसंहारः ।

शारीरकमहाभाष्यप्रकटार्थनिबन्धनम् ।
जनार्दनो निरीक्ष्येमं **तत्त्वालोकं** विनिर्ममे ॥
न विद्यते यत्र विशालजालमायाकुलग्लानिकलाकलापः।
शुद्धस्वभावं परमार्थरूपं वेदान्तवेद्यं तदहं भवामि ॥

इति श्रीमदनुभूतिस्वरूपाचार्यशिष्येण विद्वद्वृन्दपादारविन्दप्रणतकन्धरेण श्रीमता **जनार्दनेन** विनिर्मिते **तत्त्वालोके** द्वितीयोऽध्यायः ॥

———० ०———

Index of Verses

(१) अध्यक्षेण मयाधुना ध्रुवमयं बन्धो न साधिष्यते
सम्बन्धोऽपि निरूपणं न सहते बोधात्मकस्यात्मनः ।
अद्धा शौद्धयमभाणि वेदशिरसा द्वैतं दनीध्वस्यते
स्वात्मन्येव तथापि कौतुकमिदं संसार्यहञ्चेति धीः ॥ ३

(२) अनन्तत्वादशक्यत्वाद्व्यक्तयः शक्त्यगोचराः ।
लाघवाव्यभिचाराभ्यां जातयः शक्तिगोचराः ॥ ६

(३) आरम्भासंभवादेवमवयव्यनिरूपणात् ।
भूभूधराद्यनिर्वाच्यं काणादस्य सुनिश्चितम् ॥ २४

(४) आश्रित्य भाविकीं शक्तिं वेदेऽवादि प्रमाणता ।
वक्तारमनपेक्ष्यैव ततः साऽथ प्रसाध्यते ॥ ६

(५) इत्थं निरूप्यमाणोऽयं भेदः सत्यो न दृश्यते ।
स्वतः सिद्धमतोऽद्वैतं न प्रमाप्रश्नमर्हति ॥ २१

(६) एवं प्रमाणयाथात्म्यनिर्णये दुर्निरूपता ।
प्रत्यक्षेऽज्ञापि विस्पष्टाऽनुमाने ज्ञाप्स्यतेऽधुना ॥ ३२

(७) किञ्चाद्वैतप्रमाणेन स्वप्रमेयं न हन्यते ।
हन्तृत्वे तन्न तन्मानं मानं हन्तृ न कस्यचित् ॥ १९

(८) तस्मात्काणादराद्धान्तप्रसिद्धानि नवैव न ।
द्रव्याणि मानहीनत्वान्न्यूनाधिक्यप्रदर्शनात् ॥ २८

(९) तस्मात्काणादराद्धान्ते वीक्ष्यमाणेऽपि यत्नतः ।
द्वैतस्य दुर्निरूपत्वादद्वैतममृतायते ॥ २९

(१०) तस्मात्त्रिविधबौद्धीयराद्धान्तध्वान्तरूपणे ।
संदनीध्वस्यते द्वैतमद्वैतमवशिष्यते ॥ ४२

(११) धारावाहिकविज्ञाने ह्यर्थो मेयोऽन्यकालगः ।
प्रमाणासंप्लवोऽस्माद्वा ध्वंसध्वांसाप्तिभिन्नतः ॥ ७

(१२) ननु वेदान्तमानत्वे स्वार्थे ज्ञातेऽपि मानतः ।
तत्पदार्थापरिज्ञानान्न वाक्यार्थे प्रमा मम ॥ १२

(१३) न विद्यते यत्र विशालजालमायाकुलग्लानिकलाकलापः ।
शुद्धस्वभावं परमार्थरूपं वेदान्तवेद्यं तदहं भवामि ॥ ५५

(१४) भजामि शंभुं भवभीतिदारणं जगत्प्रसूतिस्थितिनाशकारणम् ।
विधूतभेदं निरवद्यमाद्यं परं पदं वेदशिरस्सु वेद्यम् ॥ १३

(१५) मानान्तराविरुद्धार्थनित्यवेदगिरामपि ।
विधिशेषत्वतः केचिद्भूते मात्वं न मेनिरे ॥ ९

(१६) लोके सिद्धे प्रसिद्धा पदनिचयगता संगतिः पुत्रकादौ,
वेदान्तेऽप्यत्र दृष्टा सकलपदगताशेषता प्रक्रमाद्यैः।
कार्यं नो तत्त्वमादौ प्रविदितमधुना कल्पनं निष्प्रमाणं
तस्मात्सिद्धाऽद्वितीये स्वमतचितितनौ मानता तत्त्वमादेः॥ ११

(१७) वेदे मात्वमसाधि वक्तृविरहाच्छब्दे च शक्तिः स्वतः
तस्मादेव समस्तदोषविकलो वेदो दरीदृश्यते।
तेनोक्तं तव सूतकित्वमभया ब्रह्मात्मता चानयो-
राशौचं स्वगतं प्रवेत्सि परतां कस्मान्न बोबुध्यसे॥ ९

(१८) वेदो वक्त्यविकारतां स्मृतिरपि प्रत्यक्षमाक्रोशति
प्रत्युक्ता विकृतिर्मृदादिषु सती तत्वे तु नो सात्र किम्।
सांशं मूढमनित्यमापतति ते ब्रह्माप्यदोषं परं
तस्मात्कष्टमहो विमूढमनसां वैकारिवाग्वल्गनम्॥ १८

(१९) व्यक्तयो व्यवहारार्हा लक्षणावर्त्मना पदात्।
औपाधिकस्तु द्रव्यादिर्जात्यभावे भवेद् बलात्॥ ६

(२०) शक्तेर्निसर्गसिद्धायाः सिद्धौ मात्वं निसर्गजम्।
अज्ञातज्ञापने शक्तिर्ज्ञानमात्वं यतो मतम्॥ ७

(२१) शारीरकमहाभाष्यप्रकटार्थनिबन्धनम्।
जनार्दनो निरीक्ष्येमं तत्त्वालोकं विनिर्ममे॥ ५५

(२२) श्रोत्रज्ञेयत्वमज्ञात्वा शब्दैकाकारधीर्यतः।
शब्दशब्दो वदेत्तस्माज्जातिं वर्णानुगामिनीम्॥ ६

—oo—

Index of Quotations

(१) "अग्नये जुष्टं निर्वपामि" (तै. सं. १.१.४) ४५
(२) "अग्निहोत्रं जुहोति यवागूं पचति ४५
(३) "अत्रायं पुरुषः स्वयंज्योतिर्भवति" (बृ. उं. ४.३.९) ५१
(४) "अत्रैव समवनीयन्ते" (बृ. उ. ३.२.११) ५३
(५) "अथात आत्मादेशः" (छा. ६–२५) ५१
(६) "अथातोऽहङ्कारादेशः" (छा. ६–२५) ५१
(७) "अथातो ब्रह्मजिज्ञासा" (ब्र. सू. १.१.१) ४४
(८) "अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव" (बृ. उ. ४.४.६) ५३
(९) "अथैष विश्वज्योतिः अथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेत" ४७
(१०) "अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति" ४५
(११) "अन्नमयं हि सौम्य मनः" (छा. ६–६) ३९
(१२) "अन्यथेयमनालम्बा लभमानोदयं क्वचित् ।
हन्यादेकप्रहारेण बाह्यार्थपरिकल्पनामिति ।' (खण्डन०) ३१
(१३) "अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः ॥" १५
(१४) "अमानित्वादिनिष्ठो यो यश्चाद्वेष्टादिसाधनः ।
ज्ञानमुत्पद्यते तस्य न बहिर्मुखचेतसः" ४९
(१५) अयमात्मा ब्रह्म (मा. उ. १.१.२) २६
(१६) "अर्थे सत्येव भवनं प्रामाण्यं ज्ञानस्येति" ७
(१७) "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो
यजुर्वेदः सामवेदः" (बृ. उ. २.४.१०) ४
(१८) अक्षरात् परतः परः" (मु. उ. २–२) १७
(१९) "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" (भ. गी. ५.१५) ५३
(२०) "आचार्यवान् पुरुषो वेद; तस्य तावदेव चिरम्,
यावन्न विमोक्ष्ये अथ संपत्स्यते ।" (छा. उ. ६) ५३
(२१) "आज्यमवेक्षते" ५४
(२२) "आदित्यः पुरुषो भूत्वा कुन्तीमुपजगाम ह" ४९
(२३) 'आनुमानिकमप्येकेषां" (ब्र. सू. १.४.१) ३९
(२४) "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ।" (मनु. १.) १७
(२५) "इन्द्राग्नी रोचना दिवः" ४८
(२६) "इन्द्रो मायाभिः पुरुरूप ईयते" (बृ. उ. २.५.१९) १५
(२७) "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते (तै. सं. ४.१.२) ४८
(२८) उदरमन्तरं कुरुते अथ तस्य भयं भवति (तै. २.७) १६
(२९) एकः एव तु भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" ॥ (ब्र. बिन्दूप. १२) ५२

(३०) "एको देवः सर्वभूतेषु गूढः" (श्वे. १०.११) ४०
(३१) "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी" ॥ (मु. २.३) २४
(३२) "ऐन्द्राग्नमेकादशकपालम्" ४८
(३३) "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" ४८
(३४) "कदाचन स्तरीरसि नेन्द्र" (तै सं. १.४.२२) ४७; ४८
(३५) "कल्पान्तेऽन्तर्हितान्वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ॥" ४
(३६) "कृत्स्नः प्रज्ञानघन एव" (बृ. १.५.१३) ५३
(३७) "चोदनालक्षणोऽर्थो धर्मः" (जै. सू. १.१.२) ४४
(३८) "जगृभ्माते दक्षिणमिन्द्र हस्तम्" (ऋग्वे. १०.४७.१) ४९
(३९) "तत्त्वमसि" (छा. ६.८) ९
(४०) "तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म चोक्तं महामुने" ५४
(४१) "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।" (भ. गी. ४–३४) ४९
(४२) "तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" ४७
(४३) "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति" (बृ. ४.४.२२) ५४
(४४) "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" (श्वे ३–८) ५४
(४५) "तयोरन्यः पिप्पलं स्वाद्वत्ति" (मु. ३–१) २
(४६) "तस्य निमित्तपरीष्टिः" (जै. सू. १.७.३) ४४
(४७) "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढां" (श्वे. १.१.३) १६
(४८) "दिक्संख्ये संज्ञायाम्" २२
(४९) "द्वादशभिरुपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति" ४७
(५०) "न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव" (ऋग्वे. १०,८२,७) ५२; ५३
(५१) "न तस्य प्राणा उत्क्रामन्ति" (बृ. ४.४.६) ५३
(५२) "नासदासीन्नो सदासीत् तम आसीत्" (ऋग्वे. १०.१२९.१) १७
(५३) "नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥" (भ. गी. २.२४) १५
(५४) "निष्कलं निष्क्रियं शान्तं (श्वे. ६.१९) १५
(५५) "नेह नानास्ति किञ्चन" (बृ. ४.४.१९) ५०; ५५
(५६) पश्यतः श्वेतिमारूपं हेषाशब्दञ्च श्रृण्वतः (मी. श्लो. वा. १.७.३५८) १०
(५७) "प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपि (भ. गी. १३.) १७
(५८) "प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया" (भ. गी. ४.१९) १५
(५९) "प्राणा वै सत्यम्" (बृ. २.१.२०) ५०
(६०) "प्रादात्तेषां स भगवान्दिव्यं चक्षुर्जनार्दनः" ३२
(६१) पृथिव्यादीनि चत्वार्येव तत्त्वानि देह एव चात्मा,
प्रत्यक्षमेव प्रमाणम्, नानुमानादिरिति । ४३
(६२) "बर्हिर्देवसदनं दामि" ४८
(६३) "ब्रह्मविदाप्नोति परम्" (तै. उ. २.१.१) ५३

(६४) "ब्रह्महा विप्रमुच्येत तस्मिन्स्नात्वा महाऽघौ" ५४
(६५) "ब्रह्मैव सन् ब्रह्माप्येति" (बृ. उ. ४.४.६) ५३
(६६) "भूयश्चान्ते विश्वमायानिवृत्तिः" (श्वे. १.१०) ५३
(६७) "मयाध्यक्षेण प्रकृतिः सूयते सचराचरं" (भ. गी. ९.१०) १५
(६८) "माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः" (भ. गी. ७.१५) १६
(६९) "मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरं (श्वे. ४.१०) १५
(७०) "मृत्तिकेत्येव सत्यम् (छा. ६–१.) ५०
(७१) "यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति" (तै. उ. २.६) १६
(७२) "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" (श्वे. ६.१७) ४
(७३) "रूपं रूपं प्रतिरूपो बभूव" (कठ. ५.१०) ५२
(७४) "वर्जितः शक्यते वक्तुं यः सदास्तीति केवलम्" १६
(७५) "विमुक्तश्च विमुच्यते" (कठ. ५.१) ५३
(७६) "विद्याञ्च" (ईश. ११) ५५
(७७) "विज्ञानमानन्दं ब्रह्म" (बृ. ३. ९) ५०–५३
(७८) "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्" (बृ.४.४) ४९
(७९) "श्रद्धावाल्लँभते ज्ञानं तत्परः संयतेन्द्रियः। (भ. गी. ६) ४९
(८०) सच्च त्यच्चाभवत् यदिदं किञ्च, तदात्मानं स्वयमकुरुतेति (तै. उ.२.६) १५
(८१) "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्।" (छा. ६–१) ९,१२
(८२) "सर्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुवं॥" (भ. गी. १२.३) १५
(८३) "सर्वस्मै वै कामाय दर्शपूर्णमासौ" ४७
(८४) "सूर्याय जुष्टं" ४५
(८५) "सेतुं दृष्ट्वा विमुच्येत ब्रह्महा ब्रह्महत्यया" ५४
(८६) "सौर्यं चरुं निर्वपेत्" ४५
(८७) स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम्।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते॥ ८
(८८) "हत्वाविद्यां धियैवेयात्तद्विष्णोः परमं पदम्" ५४
(८९) "ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते" ५४

——oo——

Index of Proper Names and the Names of the Schools

(१) अख्यातिवादी ५२
(२) अद्वैतवादिनः ३८
(३) अन्विताभिधानवादी १०
(४) अभिहितान्वयवादी १०
(५) अक्षपादपादोपजीविन् २१
(६) उदयनः १, ५, ७, ८, १३, २२, ३३.
(७) कणभक्षः १
(८) कणादः २३
(९) कर्ममीमांसकाः ६, २१, ४४
(१०) काणादः १४, २१, २३, २४, २८, २९.
(११) कापिलः २१, ३९
(१२) कालिदासः ३, ४
(१३) गुरुमतम् १०
(१४) गौतमः २९
(१५) चार्वाकः ४३
(१६) चार्वाकपक्षः ४३
(१७) तार्किकाः २, ४, ८, १३, १५, २५, २६, २७,३७ ५२
(१८) दिगम्बरः २१
(१९) दिगम्बरजैन ४२
(२०) नैयायिकः २९
(२१) नैयायिकादयः ६
(२२) पाणिनिः २२
(२३) प्राभाकराः ४४, ४५.
(२४) बौद्धः ४०
(२५) ब्रह्मप्रकाशिकाकारः १६
(२६) भट्टपादादयः ८
(२७) भट्टपादीयाः ८
(२८) भास्करः १६
(२९) भास्करीयाः १५
(३०) भूषणकारः ४
(३१) मीमांसकः ३२

(३२)	लोकायतिकः	२१
(३३)	वेदान्तिनः	८
(३४)	वैशेषिकाः	७, १४
(३५)	शंभुः	७
(३६)	सांख्यः	३९
(३७)	सुगतनैयायिकः	९
(३८)	सौगतः	२१

—— oo ——

ERRATA

पृ.	पङ्क्तिः	अशुद्धम्	शुद्धम्
६	१३	निर्देश्यैवेति	निर्दिश्यैवेति
१०	२०	व्यत्पित्सु	व्युत्पित्सु
११	६	तत्वतो	तत्त्वतो
११	२४	कारान्	कारात्
१२	९	बिधुरा	विधुरा
१२	२४	लक्षम्	लक्षणम्
१६	१	श्रयमाणं	श्रूयमाणम्
१८	१९	हेत्वन्तरद्वा	हेत्वन्तराद्वा
१८	२७	सव	सर्वे
२०	१२	गृहीतुं	ग्रहीतुं
२२	३०	वकात्	बलात्
२५	४	त्वाधित	त्वबाधित
२७	४	संभव	संभवः
२८	७	संभवात	संभवात्
२९	१२	पराहृतं	पराहतम्
३२	३१	धूमवात्वात्	धूमवत्त्वात्
३७	१४	कलितत्वान्	कलितत्वात्
४३	१४	प्रामाण्यभिधानं	प्रामाण्याभिधानं
४८	१३	त्त्वेन	त्वेन

—— ० ० ——